सरस्वतीकण्ठाभरणविवरणम् रत्नदर्पणाख्यम्

द्वितीयपरिच्छेदस्य

२२६

नुसं॰
१

श्रीगणेशाय नमः ॥ क्षेत्रमध्यं विशालाक्षी यस्याधिवसति प्रिया। अविमुक्तप्रतिष्ठाय तस्मै कामदुहे नमः। अघस्मु
रतु वाग्देव्याः कंठाभरणकौतुकं मयि प्रबद्धमनोवृत्तौ तन्वाने रत्नदर्पणं। एवं दोषगुणेषु निर्णीतेष्वलंकाराः प्रा
प्तावसरास्तत्रालंकारसामान्यलक्षणमाद्यपरिच्छेदे तद्विभागं दर्शयन् परिच्छेदत्रयं संगमयति। शब्दार्थोभयसं
ज्ञाभिरिति। इत्थंभूतलक्षणे तृतीया। मध्यमपदलोपी समासः तेन शब्दालंकारार्थालंकारोभयालंकारसंज्ञाभि
रित्यर्थः। गुणप्रस्तावे बाह्यत्वादिकं विवृतं। शब्दोवच्छेदकतया प्रथमप्रतिसंधेयभावेन च शरीरस्थानीयो बा
ह्यस्तत्र स्तदाश्रयालंकारा अपि बाह्याः। अर्थोवच्छेदकतया पश्चादनुसंधेयतया चात्मतुल्य आभ्यंतरस्तेन तदाश्र
या अलंकारा अप्याभ्यंतराः एतेन बाह्याभ्यंतरा व्याख्याताः। आश्रयाश्रयिभावश्च यथा तथोक्तमेव। उभया
लंकारेषु योगस्य प्रायिकत्वमाश्रित्य कवीश्वराणामनुशासनमुक्तं। एतद्विवेचयिष्यते चतुर्थारंभे। शब्दा
ति लंकारसामान्यलक्षणमाह। येत्युत्पत्तौ। विशिष्टा उत्पत्तिर्व्युत्पत्तिः लोपागमविकारादिप्रपंचः अत एव हि सं
स्कृतादिजातयो व्यवतिष्ठन्ते। आदिग्रहणाद्गुरुलघुसन्निवेशादयो गत्याद्यवच्छेदास्त्रयोविंशतिरूपाताः जाति

१

रित्यादि· तेच प्रतिविशेषं वद्यंते· बोत्यकंकणादिसाम्यादियं संज्ञा प्रवृत्तेत्याह· शब्दालंकारसंज्ञा इति· शब्दालंकार
जातयः शब्दालंकारसामान्यानि· स्वरूपस्थितो रूपांतरगवेषणमुचितं। मतो जातेः प्राधान्यात्प्रथमं लक्षणमि
त्याह तत्रेति· संस्कृतमिति भावप्रधानो निर्देशः। तारतीग्रहणं स्पष्टार्थं· नच वश्यं शब्देन संस्कृताघन्यतमेन
भवितव्यं· तत्कोत्र कवेः शक्तिव्युत्पत्त्योरंशो येनालंकारता स्यादित्यत आह। सेति। औचित्याहृष्ट एवालंका
रोऽस्तिच संस्कृतादेरपि तथाभावइति भावः। यद्यप्यौचितीपूर्वं दर्शयितुमुचिता तथापि प्राधान्यमावेद
गवक्रौ यितुं पृथगुक्तौचितीमाह। संस्कृतेनैवेति· विषयौचितीमाह नम्लेछितव्यमित्यादि। म्लेछनमपशब्दः प्रह
तं संस्कृतभवं· अभिजातः शुद्धान्वयः। अथके संस्कृताघुचिता वक्तार इत्यत आह। देवाद्या इति। आदिग्रह
णेनऋषिभूमिपतिप्रभृतयः। वाच्यौचितीं दर्शयति संस्कृतेनैवेति॥ यथाहि· देवतास्तुत्यादौ संस्कृतं
स्वप्रगल्भं तेन तथा प्राकृतादि यथाच सूक्ष्मवस्तुस्वरूपोट्टंकने प्राकृतस्य सौष्ठवं न तथा संस्कृतादेरित्या
दि· द्वित्राभिः कोपिकाव्यसमस्याभेदस्यार्थः सर्वाभिः कश्चन प्रकरणादेरर्थः विषयौचित्यमेव वक्तुचिद्विशेष
कांतिप्रकर्षमर्पयतीत्याह· नात्यंतमिति· समानबुद्धिशीलवयसां विनोदार्थमासनबंधो गोष्ठी· देशौचिती

न·स·
२

माह। श्रयवंतीति· लटभं मनोज्ञं· स्वेन गुर्जरजातीयेन· ब्रह्मन्नित्यादिना निर्यदनुवादेन गोडेषु प्राकृता नो चितं राजशेखरेण व्यंजितं· समयोचितीं दर्शयेति· केनूवन्निति· आद्यराजः शालवाहनः साहसांको विक्रमादित्यः ग्रंथकृत्पूर्वजतया श्रीपदं· ताइमाः परस्परसंकीर्णाः षडेव संस्कृतादिभाषा भवंतीति सामान्यविभागमेतद्विरचनप्रयोजनं चोपसंहरति। गिरइति। दिव्याः संस्कृत्रिमाः भूतवचनं पैशाचं· मथुरावासिभणितिः सौरसेनी· तेषामिति· तच्च भूतवचनं सचापभ्रंशस्ताश्च दिव्याद्याइति नपुंसकमनपुंसकेनेत्येकशेषः पाक्षिकबहुवचनं· प्रतिभार्थप्राणना जीवद्वर्णनानिपुणो हि कविः स एव हि सर्वेपथीनतद्युक्तिसिद्धिसंपन्नः कविराजोऽत एव विजयते सकललोकशास्त्रवचननिर्माणमहिम्न्यः प्रकर्षेण वर्त्तत इति· संस्कृतादिषु यथायोगं शुद्धादिभेदेन जातिः षोढा भिद्यत इत्याह· अंशा साधारणीति· इह भाषारूपविषयभेदेन भिन्नाः संस्काराः यानधिकृत्य पाणिनिवररुचिप्रभृतीनामनुशासनानि व्यवतिष्ठन्ते तत्रैक एव संस्कारः प्रत्यभिज्ञायते सा शुद्धा· संस्कारांतराग्रहणात्· यत्र तुलक्षणसंभेदेन नानासंस्कारसंपातः सैव सा साधारणी· रूपसाधारण्यात् नरसिंहवत् भाषाभेदव्यवस्थितभागद्वयात्मिका मिश्रा· रूप

पु
शु
४
२
नीर

मिश्रणात्· तिलतंडुलन्यायेन संकीर्णं· विजातीयवस्त्वंतरव्यतिरेकएव लोके संकीर्णव्यवहारात्· या पुनः
प्रकृतिभागेनापि भाषांतरसंपर्कं न सहते सा नान्यगामिनी॥ संस्कारसंभेदेन वा प्रकृतिभावेन वा नान्यं गच्छ
तिपतः अपशब्दरूपाऽपभ्रष्टा· तां सूक्तमेति· पात्रलक्षणमुत्तमादिभेदश्च पंचमे वक्ष्यते· उन्नमिते केति· पदा
निप्रकृतानंगलेखोचितानि निव्यजिप्रे[illegible]मगर्भाणि· अत एव वापोह्यापप्रतिसंधाननिमग्नमानसापार्श्वितां
व नुभाव्यरूपं मूलतावितिरेचितमिवासीत्· हस्ततलनिहितैककपोलायास्ताहक्पुलकितैककपोलदर्शनादभिमाना
त्मा शृंगारः सुप्तप्रबुद्ध इव तत्कालं नायकस्यापीति मिथोनुबंधलक्षणाऽपूर्वानुरागकक्षामधिरूढा रतिरेव काव्य
एय सर्वस्वीयते· अत्र चकस्यचित्पदस्य भाषांतरस्पर्शाधारेऽप्येपि भूयसामुदाहरणत्वं· एवमन्यत्रापि। तुम्हण आणे
दूति। विलुलिअंबलवल्लतमभिमुखं· शादमाणुशेति· शातं मानुषमांसमाराः कुंलैसहस्रंवसौलिः संचितं पूर्णं· अ भिः
निशंचपिबामि शोणितं वर्षशतैः समरो भविष्यति· अत्र मांसादिलाभहेतुतया समरा[illegible]सर्वैबीभत्सुमुन्मुद्रयद्भी नं
नपात्रतां द्रढयति। नात्युत्तमेति· उत्तमादपकृष्टं मध्यमादुत्कृष्टं नात्युत्तमं। प्रणमत प्रणयप्रकुपितगौरीचरणा
ग्रलग्नप्रतिबिंबं। दशसु नखदर्पणेषु एकादशतनुधरं रुद्रं। एवं नामदेवीकेपि भगवतः प्रणयकातरतायेन युगपद्

वसर्वाभिरपि मूर्त्तिभिः प्रणमतीति प्रतीयमानोत्प्रेक्षा· नातिमध्येति। हीनादुत्कृष्टं मध्यमादपकृष्टं नातिमध्यमं· तस्मी
ति। कामस्स कामाय· चतुर्थ्याः षष्ठीति सूत्रणात्· नातिहीनेति· हीनात्किंचिदुत्कृष्टं मध्यमादूरादपकृष्टं नातिहीनं। ल
द्धबप्पुलेति। लद्ध गहाण ब्बप्पुलेत्यनुकंपासंबोधने· पिब दुग्धं· कुतोस्माकं छासि पदान्निधेयं तक्रं। पुत्त हमल्छे इतिश
पथः पुत्रस्य मस्तकेनाहं शपे यदि तक्रस्य व्यापकं दधि जन्मन्यपि जातमासीदिति व्यापकानुपलब्धिः प्रयुक्ता। अ
नुप्राकृतादिष्वृत्तमादिपात्रव्यतिकरदर्शनात्कथमेषा व्यवस्था घटत इत्यत आह। प्रायिकमिति। यत्र प्रकृतनि
र्वहणोचितविशेषाभिसंधानेन कविरन्यथा प्रवर्त्तते· यथा मालतीसंस्कृतमाश्रित्य· एषोस्मि भोः कार्यवशादायो
गवशाच्च प्राकृतभाषी संवृत्त इत्यादि यत्र वा कवेर्व्युत्पत्तिकृतो भाषाविपर्यासः शक्त्या तिरस्क्रियते यथा मृच्छ
कटिके विटस्य मध्यमपात्रस्यापि संस्कृतोक्तिः यत्र वा प्रबंधौचितीपरवशाः संस्कृतादिजातयो विपर्यस्यंते· यथा
सर्गबंधादौ मध्यमादेरपि संस्कृतमेव खंडकथापरकथादौ उत्तमादेरपि प्राकृतमेव· बृहत्कथादौ पैशाचमेव·
वस्तुबंधादावपभ्रंश एवेति· तत्र संधिसंध्यंगघटनासौष्ठवेन रसः पुष्यतीति भरतमुनिप्रभृतीनामतिप्रकाश
एव पंथाः। साधारण्यादयः पुनरिति। संस्कृतस्य प्राकृतादिसाधारण्ये पंचप्रकाराः प्राकृतस्य सौरसेन्यादिसाधा

रण्येचत्वारः सौरसेन्याः पैशाच्यादिसाधारण्येत्रयः पैशाच्यामागधादिसाधारण्येद्वौ· मागध्याअपभ्रंशसा
धारण्येएकइतिद्विविकल्पेपंचदशप्रभेदाः त्रिविकल्पेविंशतिः चतुर्विकल्पेपंचदश· पंचविकल्पेषट्
षड्विकल्पेएकइतिसर्वमिळनेसप्तपंचाशत्प्रकारासाधारणी· एवंमिश्रादावपिलोष्टप्रस्तावक्रमेणबह
वोभेदाइतितावदुदाहरणेग्रंथगौरवंस्यादितिदिङ्मात्रमुदाहरति· तास्विति· संछिन्नसंस्काराभा भि
षाप्रयोगेहिप्रयोक्तृप्रकृतिसंभेदेर्भवति· नचप्रकृतिसंभेदेभवति· नचप्रकृतिसंभेदेस्तात्विकःस्व
भावसंकरप्रसंगादत उक्तंमध्यमपात्रस्थेति। भूमिकावर्णिका· मध्यपात्रप्रकृत्युचितोरागाद्यभिन म
यःतत्रतिष्ठतितत्परिग्रहेण· चित्रतुरगवत्सामाजिकानांसम्यङ्मिथ्यासंशयसादृश्यप्रतीतिविलक्षणा
प्रतिपत्तिपदवीमवतरतीतिमध्यमपात्रभूमिकास्थेमुपलक्षणंचेदमुत्तमभूमिकास्थमध्यमप्रयोज्या
पीयमेव· एवमुत्तरत्र· तवविरहायासंसोढुंममचित्तमसहमितियोजना· अनंगस्येयमानंगी। वक्त्र
त्कृभि विषयेति। यदोत्तमादिषुनानावक्तृभिरेकाकाव्यसमस्याक्रियते· भिन्नभाषोचितवर्णनीयविषयंवाक्य
म्य मेकमुपक्रम्यते· यदावाशक्तिनिरूपणायकवेरेवनानाभाषामयंकाव्यमारब्धंस्यात्तदाकथंनालंकारप

५

द्वीमध्यास्ते। मिश्रेति· तमल्लिअंतीतमालीयमाना· दुर्विदग्धादीति· नागरकभावमवाप्तस्तद्भूमिकामवलंबमानोदु
र्विदग्धः आदिपदात्पूर्वोक्ताः समस्यादयः। अकरमाश्चर्यं· गुमटीमनोज्ञा· आस्फालितरवेद्रूस्येवस्फुरणेलव
द्रुयदृतिमहाराष्ट्रदेशी· तथाचप्रयोगः लवड्दविज्जूमणोहरीत्याराध्याः अन्येतुलपतीत्यर्थमाहुः एवंचक
लशब्दः पुष्यतीति· याम्योदक्षिणः निवारयनिर्वचकोवारकश्शून्यः वाइद्वाति· अलाआगतः यदिहमानो
नक्रियेत्तज्ज्योत्स्नादयोमनोमुदमेवाधास्यंतीतिप्ररोचना· यदातुमनोनुदइतिपाठः अपिशब्देननायक
साधारणमुक्तं गद्धरित्वमुक्तंचंद्रज्योत्स्नादीनामितिअत्तोनकजनकजंनार्थोनार्थईर्ष्यारोषलक्षणेनप्र
तिकूलभावावलंविनामानेनतस्मात्प्रियमेवप्रतिजाकुर्यामः यदामनंतिस्वयंवातत्रगमनमिति·
क्रीडेति· काव्यसमस्याक्रीडाउक्तपूर्वागोष्ठीतत्रविनोदोमनोनुकूलत्वेनसमयातिवाहनं· आदिपदंपूर्ववत्·
ननुमाभूत्प्रकृतिभावेनभाषांतरसंभेदः संस्कारसंपातेनतुभविष्यतितथाचकथंसाधारणीतोक्तिघतइ
त्यतआहअसाधारणीचेति· गोसेप्रभातेतिरिंछिरिंछोलीकमलरजः पंक्तिः तल्लुमत्यसरः तूहं तीरं· विबु
हिदाप्रसारिता· नात्रस्वर्वोत्तराद्वयोरेकैमत्यमुदाहरणत्वात्· आराध्यास्तुयथासरस्तीरिकमलरजःपं

का दु भि ४

भार

क्तिः प्रसृता शोभते तथा विद्वद्गोष्ठीषु भीष्म वाक्यानीत्युपमाकल्पनया कथंचिदेकवाक्यता मा दुः। अत्र पूर्व
र्द्धे पदानीति नलीम्ला दयोनभिधानादिति भाषान्तरस्थानि वस्य प्रतिषेधात्. एवं वाचस्पति विशिष्टरसेन
सप्रचेतसपोतादयो द्रष्टव्याः। प्राकृत एवेति। महाराष्ट्रदेशीत्वाद्देशी पदानां चस्थानिभावसंभवात्. भाषान्तराणां
पुनरिति। सिद्धिर्महाराष्ट्रीतः सिद्धिः सौरसेनीत इति उपक्रम्यानुशासनानन्द्रवरूपत्वेवस्फुटा. तत्समानां तु
साधारण्यमेवेति. मुग्धे ग्रहणकं रत्नमूल्यबंधकं गृहाण धारय मुद्रामंगुलीयकं निजहस्ते. निश्चयः सुंद
रितवो परि मम सुरतस्पृहास्तीत्यत्र तवमुपरि सुरतस्पृहमस्तीत्यादिकमपशब्दबहुलत्वेनापभ्रष्टास्पष्टे
वसातु कथमलंकार इत्यत आह। सेयमितिश्रोत्रियश्छांदसः आद्यपदेन बालादयः सर्व एव हिलो किं कः प
पदार्थाजिनयकक्षामधिरूढः परित्यज्य ग्राम्यमभिमुखीभूतो विद्वद्वादिषु कथं नालंकारः तदिदमुक्तं प्रयो
ग इति. न चापशब्दानां दोषत्वमेवेति वाच्यं - अनुकरणे तु सर्वेषामिति दोषसामान्यविबिना गुणीभावे नास्य
विषयीकृतत्वादिति. नानावछिन्ना जातिः काव्यशरीरे निविशत इति तदवछेदरूपां गतिमनंतरं लक्षयति.
पघमित्यादि. पङ्क्तेः पदात्पदांतरसंचारो गतिः सा केनचिदौचित्यो पनिपातिना संदर्भपरिमाणेन नियम

५

म्यते· ततस्तद्वदुपचारेण गतिः पठितिपरिमाणं च काव्यं समाश्रयत इति तदपि गतिः तत्र पद्यादिभेदे न
त्रिविधमिति संक्षेपः अत एव गद्यवंधेतुके ष्विह तमाश्रितं वृत्तं वर्त्तनमियत्तेति या वदिति· सर्वतोमश्
चा हि कदाचिदुद्देश्यस्य लिंगमाश्रयं ते कदाचित्प्रतिनिर्देश्यस्येति काव्ये यत्नागतिरित्युक्तं· तत्र पद्यं चतु

5

ष्पदीति न लक्षणं उल्लालमात्रादौ द्विपदपंचपदादिशरीरेतरभावात्· अपादः पदसंतानो गद्यमित्यपि
न· अपादत्वहाप्रत्यभिज्ञायमानवृत्तभागत्वं विवक्षितं· चतुष्पदीव्यतिरिक्तत्वं वा· आद्ये वृत्तगंधिपद्यं
न स्यात्· द्वितीये त्वतिप्रसंगः तस्माच्छंदोनियमवर्जीकाव्यमतथाभूतं तु गद्यमिति विभागः। गद्यपद्यात्म
कं वाक्यं मिश्रं· तदस्या गतेरलंकारत्वमुपपादयति। अर्थौचित्यादिरिति· तत्रार्थौचितीमाह। कश्चित्पद्ये

ऊ

नेति· यथा ह्यटवीवर्णनादौ गद्यं प्रगल्भते तथा न पद्यं यथा च काव्यशास्त्रतानिर्वहणौचितेर्थे पद्यमुल्ल
हते न तथा गद्यमित्यादि· एवं कथाख्यायिकादौ गद्यमेव चंपूप्रभृतौ मिश्रमेवेत्यादि पदोपात्तवंधौचिती
द्रष्टव्या· आस्तां तावदर्थौचित्यगवेषणं स्वरूपेणैव पद्यादिकं परिस्फुरत्कविप्रतिभाविशेषावेदने

५

न सहृदयहृदयावर्जकमवसीयते· कथमन्यथा क्वचिदेव कस्यचित्सौष्ठवमित्याह। यादृगिति। गत्यां ग

त्यामिति· पद्ये गद्ये मिश्रे चेत्यर्थः। विचित्रा अव्यवस्थितसिद्धिका· प्रयोगव्यवस्थामुपपादयति· यथामती
तीमतिर्व्युत्पत्तिर्युक्तायुक्तविवेक इति यावत्· शक्तिः कवित्वबीजभूतः प्राक्तनः संस्कारः औचित्यं दर्शि
तमेव· रुचिर्मनोनुकूलताप्रतिसंधानं कवेः पात्रस्येति यथायोगं· तथा हि शक्तिव्युत्पत्ती कवेरेव· औचि
त्यं पात्रस्यैव· रुचिरुभयोरपीति· स चायं संदर्भविच्छेदो गुरुलघुसन्निवेशेन वैशेषात्तदिति तमाश्रित्य
श्रु विभागमाह· द्रुतेति· आद्यास्तिस्रः [illegible]द्वाः आसामेव मिथो व्यतिकरेणोत्तरास्तिस्रः संकीर्णाः। कथमेषा व्यवस्थे
त्यत आह· सा गुरूणामिति· बाहुल्यमल्पत्वं मिश्रणं च तुल्यवत्प्रतिभानं· न गद्यादिकमेव गतिः किंतु त
दाधारः पद्यमिति संचार इति व्यनक्ति· पद्ये गद्ये च मिश्रे चेति· वर्णनियतं छंदो वृत्तं· मात्रानियतं जातिः सम
प्रस्तावं समं· प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च तुल्यप्रस्तावमर्द्धसमं· उभयवहिर्भूतं विषमं· उत्कलि
काकल्लोलः तत्रापमुच्चावचमिव प्रतिभासमानमित्यर्थः। यथा सलीलकरकमलतालिकातरलवलया
वलीकमिति· वृत्तगंधि प्रतिभात वृत्तैकदेशं· तदेतदल्पाख्यायामुत्पन्नेन समासांतेन व्यंजितं तदयम
र्थः सामान्यतः पद्यादिभेदेन गतिस्त्रिधा· तत्रापि जात्यादिभेदेन षट्प्रकाराः· ते पि द्रुतादिभेदेन षड्वि

६

शदिति · ननु ललिताद्यो गघभेदाः कैश्चिदलंकारकारैः परिसंख्याताः ते कस्मान्नोच्यंत इत्यत आह। ललितमित्यादि·
सुकुमारसंदर्भे ललितं · यथा कमलिनीवनसंचरणव्यतिकरलग्ननलिननालकंटकेवनक्षचिन्निर्भरं पदमाव
ध्नातीति · प्रस्फुटसंदर्भे निष्ठुरं · यथा उत्तंभितकुटिलकुंतलकलापः श्मशानवाटमवतरतीति। अनुल्लिखितसमा
संपूर्णं यथा · अभ्यासो हि कर्मणां कौशलमादधाति · न खलु सन्निपातमात्रेणोदबिंदुरपि ग्रावणि निम्नतामादधा
तीति · उद्भटसमासमाविद्धं · यथा · कुलिशशिखरखरनखरप्रचयप्रचंडचपेटपाटितमत्तमातंगमदच्छटाछुरि
तचारुकेसरभारभासुरमुखे केसरिणीति। रीतिरव्येरिति विषयसप्तमी। तथा · ललितं कैशिक्यादौ। निष्ठुरमार
भट्यादौ। चूर्णं वैदर्भ्यादौ। आविद्धं गौडीयाप्रभृतौ॥ यथायथमंतर्भवतीति नोक्तभेदाः परिसंख्याता इत्यर्थः। उक्तप्रका
रेषु किंचिदुदाहरति। अत्रेति। नवसंगमभीर्विति सोत्प्रासं संबोधनं। भीरुशब्दादूङंता संबोधनह्रस्वरूपं। गर्भ
गृहस्थानालोकयति चेत्तदाहसंप्रवदंतीति॥ अत्र प्रतिपादमष्टौ लघवश्चत्वारो गुरव इति लघुबाहुल्ये संयोगान्तरा
णामुद्रेके चतालल यवदति व्यक्त एवद्रुतभावः। प्रणाम्येति॥ अत्र यद्यपि पदचतुष्टये गुरुलघूनां समसंख्यत्वमे
वतथापि संयोगाद्वर्णैरंतरांतरापतितिर्दीर्घभावोन्मेषादारोहप्राधान्ये विलंबिता। एवं व्युत्क्रमेण समानिका या

६ ७ २ ६

मपि विलंबितेनैव। यथा मीनजालघट्टितानि सूर्यरश्मिबोधितानि मत्तषट्पदाकुलानि पश्य भीरु पंकजानि। तदिद

माह सेयमिति॥ तेन विभागसूत्रेण गुरुलघुमिश्रणामेवं रूपमपि द्रष्टव्यमिति। आसीदिति। अत्र यद्यपि गुरवो बहव

स्तथापि न द्रुतेन विलंबनं पठितैरित्यनुभवसाक्षिकोयमर्थः तदेतदाह नातिलघ्व चरेति॥ अवतु वइति· अरुणोग

रुडाग्रजः श्रीणश्च· नायको नेता हारमध्यमणिश्च· पयोधराः मेघाः स्तनौ च· तदेतस्मिन्द्रुतविलंबितारव्ये वृत्ते स

मारव्येव रूपं बोधयतीति। अपि तु रगेति। उत्पन्नाविर्भवद्धर्षगतो ज्ज्वलविचित्रकोमलमयूरस्तत्कालमव्याजं

प्रेमनिर्यंत्रणं कचग्रहविलुलितप्रियाकेशपाशवासनाविकाशहेतुः सर्वेस्वायमानः कथं वा णालक्ष्यतां सहतइति

द्विप्रत्ययेन व्यज्यतइति· अत्र पादचतुष्केपि प्रथमं द्रुता पश्चान्मध्या च भागशः प्रत्यभिज्ञायतइत्याह। सेयमिति।

दुंदुभयइति। अत्रापि प्रतिपादं पूर्वं मध्या· ततो विलंबिता च स्वंऽशः प्रतिभासतइति दर्शयति। सेयमिति। इमामेव व्यव

स्थामर्द्धमध्यमादिषु वृत्तिषु दिश्यतइति दिङ्मात्रमुदाहरति एवमिति। उत्कलिकाप्रायेति। उच्चावचभावेन प्रतिभा

समानमुत्कलिका। यथा· सलीलकरकमलतालिकातरलवलयावलीकमिति· तथैव तद्रूपि प्रहतोदाहरणमिति व्यक्तं

पाताले त्यादौ वसंततिलका भागइव हरद्रुवेत्यारा वार्या भागइव प्रतिभातीति· रत्नगंधौ जातिगंधाविति· भाषित

पुंस्कं पुंवद्भालवस्येति पुंवद्भावेन नुम्न भवति· हन्तेति· आश्चर्यस्तिमितस्य हन्तेत्येव वागनुभावः ततो भिमानो
न्मेषे पुण्यवानस्मीति अनंतरं लोकोत्तरविभाववर्णना त्वरितस्य यदहमित्यादिग्रन्थपर्यवसान एवाविरलमि
त्यादिहृत्तमा विरासीदिति मध्ये विच्छेदकारणानुपपत्तेर्गद्यपद्याभ्यामेकवाक्यं। असाविति। दूतीकल्पे कया
चित्प्रच्छन्नप्रार्थनीयया आ संभोगमुन्नयेदित्याम्नातं· तदिहोत्प्रेक्षामनोहरग्राम्यमालोकनमुक्तं· तेनैकस्मि
न्वर्णनीयवस्तुनिवृत्तप्रपंचेनोक्तेः मकृत संगतिमात्रं गद्येन कृतवतीतियुक्तेयमानुपूर्वी वाक्यैकवाक्यता चेति।
वैदर्भादीतिगुणवत्पदरचना रीतिः गुणाः श्लेषादयः काव्याव्यभिचारिणो नव· तेषामन्योन्यमीलनक्षमतया पा
नकरसद्रवगुडमरिचादीनां खाडवद्रवमधुराम्लादीनां यत्सम्मूर्छनरूपावस्थांतरगमनं तत्संस्कारादेव हि लोक
शास्त्रपदस्खनातः काव्यरूपा चरचनाव्यावर्तते· अत एवमुच्यते कविभिरा संसारमिति मार्गपदेनोच्यते· वैदर्भा
दयो विदर्भादिदेशप्रभवाः तैः कृतमुखहेवाकगोचरतया प्रकटितो न तु तत्तद्देशैः काव्यस्य किंचिदुपक्रिय
ते· पंथा इति। प्रतिष्ठंते हि महाकविपद्वीलाभार्थिन इति· ईदृशमेव रीतिलक्षणमानंदवर्द्धनादीनामभिमत
मेतदुपलक्षणतया सूत्रं व्याख्यातं· कथं पुनरुक्तमुपमादेशेति पदं प्रवृत्तमित्यत आहरीड्गताविति· रि

=विभाग=

यं रीतिशब्दो मार्गपर्याय इत्यर्थः। एवं सिद्धे सामान्यलक्षणे माह। वैदर्भीति। वक्ष्यमाणरीत्या वैदर्भीप्राधान्यमभिप्रेत्याह। तत्रेति। असमासा अनुद्भिन्नवितसमासाः निःशेषाः श्लेषादयो न वगुणाः श्लिष्टगुंफिता मिथो मिलनेन संपृक्ताः सन्निधिनेरनुपलभ्यमाना न्यतममात्रेके स्यापि परस्पर यिमक्रं स्वरूपभावेन सहृदय हृदयसंवादगोचरे स्त्रा रस्या। एवं विपंचीस्वर सौभाग्या। विपंची वाग्रूपा सरस्वती बिंबप्रतिबिंबभावेन विद्धिधा। प्रतिबिंबाधिष्ठानतया दार्वादि यंत्रमपि विपंचीत्युच्यते तदीयाः

यं ते परंपरया गच्छंत्यनयेति करणसाधनौ स्वराः तंत्रीकंठोल्लिताः स्थानक्रमवैपरीत्यानुमेय शारीरः प्रतिबिंब भावाः षड्जादयस्तेषु श्रुतिसंमूर्छनेन रूपेष यमियो विभक्ताः श्रुतयः श्रोत्ररंजकस्वरएवस्थामापन्नाः समस्तगांधर्व वित्साक्षिकाः प्रकाश्यंते· अतएव वीणेव प्रधानं समस्तस्य स्वरजातस्य तत्रैव श्रुतिमंडलोन्मेषादिति· यद्वा तुपानकादिन्यायेन कश्चिद्रसउद्रिक्तो भवति तद्रीत्यंतरमुत्तिष्ठतीत्याह। समस्तेति· ओजः कांतिविवर्जिता ओजःकांत्योर्विशेषेण वर्जिता· न्यग्भूतौ जःकांतिगुणामितियावत्· यतस्तत्र तिद्वंद्विनो माधुर्यसौकुमार्ययोस्तत्रोद्भवः तदेतदाह। मधुरां सुकुमारां चेति· अतएवौजः प्रकाशकः षडधिकेषु पदेषु समासो न क्रियते· समस्तेति· अत्युद्भटानि सोल्लेखसमासानियस्मादोजःकांत्योरुद्भवे न्यग्भूतगुणा समकेयं रीतिः अंतराळइति। माधुर्यसौकुमार्ययोः किंचिदुद्भवेन निमीलनांगप्राधान्येन वाऽतरालकल्पना· तां व्यनक्ति· द्वित्रेति· द्वे त्रीणि वा त्रीणि चत्वारि वेति वार्थे बहुव्रीहिः। समस्तेति। यद्यप्युपक्रांतरीत्यनिर्वाहो त्राप्यस्ति तथापि तिलतंडुलवद्विभक्तरीतिसंवलनस्य कविसंरंभगोचरस्योत्तररीतेः पृथग्भावः पूर्वरीतेरिति· एकां रीतिमुपक्रम्य

निर्व

यद्न्यया संदर्भ ग्रहणमसावन्य एव प्रकारः नचानिर्वाहो दोषः छायावैरूप्याभावात्· रीतित्वं उनेपि हि संदर्भसौ

ग

भाग्यसंपत्तिः शक्तिमेवाविष्करोतीति मनीषिता इति। अत्र दीर्घसमासाभावे कथमोज इति कस्यचित्कुदेश्यम ---
रीतिमत्प्रकरण एव एतेन गुणानधकस्य समकत्तया संभेदो गुण इति। असमस्तपदेत्यनुल्लेखसमासपदेत्यर्थः
समग्रा नव गुणा वतीति नित्ययोगे मतुप् गात्रभिधानेति अत्रा घतृतीययोः षट् द्वितीये च पं च पदानि समस्ता
नि ओजः कांत्यभावादिति ईषदर्थे नञ् अत एव माधुर्यसौकुमार्ययोरुन्मेषः श्लिष्टा प्राप्ता यथासंख्यमोजः
कांतिनिमीलनलब्धप्रादुर्भावाश्लथा पुराणी च छाया यये ति विग्रहः आवस्कंदो धाटकः समस्तोद्भटभूरिपदे
ति उद्भटताप्रौढिप्रकर्षः एतानीतानि सहतनोरसमं जसानि मार्गतरवइति द्वे द्वे पदे आलंबिते त्या शेत्रीणि
पदानि समस्तानि माधुर्यसौकुमार्ययोर्मनागुन्मेषः पांचाली मार्गः इतरेषां समकत्ता वैदर्भी मार्गः अनयोः
संभेदे नांतरालकल्पनाव्यक्तैव अयमिति मुद्राभंजन इति द्वाभ्यां समस्ताभ्यामावंती उदयगिरीत्यादि
ना पंचके न पांचाली प्रौढिप्रकर्षेण गौडीया अयमुदयतीत्या घसमासेन वैदर्भीचिप्रत्यभिज्ञायत इति
पूर्वोक्तिसमस्तरीतिसंभेद इति। कृशिकवलनेति अत्र पूर्वार्द्धे यथोक्तामावंतीमुपक्रम्य चरमार्द्धे गौडीयाप
रिग्रहाद्युपक्रांतरीतेरनिर्वाहः खंडनं तथापि च न छाया वैरूप्यमिति कविशक्तिव्यंजकत्वादलंकारमा

वइति। त्राको वृत्तविशेषः। याविकाशइति। वृत्तिर्वर्त्तनंरसविषयोव्यापारः काव्यस्यरसप्रवणत्वात्· सचव्या
पारःसत्वाद्युद्रेकलक्षणोजन्मांतरानुभवभावितवासनासमुत्थः परिपूर्णीभविष्यद्रसास्वादसर्वस्वोमान य
चित्तावस्थानिदानभूतोर्थगतः पंचमेभिधास्यते· शब्दगतः पुनरत्रसंगतः संदर्भस्यरसप्रकाशकारणेषुप्रधा
नत्वात्· यादाह। कविवागभिनेयश्चतदुपायोद्विधेष्यते· वस्तुशक्तिमहिम्नातुप्रथमोत्रविशिष्यते· वर्त्ततेनया
चित्तमितिकरणसाधनोयंवृत्तिशब्दइतिवर्त्तयित्रीत्यनेनप्रयोजकव्यापारप्रधानेनदर्शितं· तत्रविषयवैचि
त्र्याद्विकाशाद्याश्चतस्रश्चित्तावस्थाः विषयोहिदीप्तमसृणमध्यमभेदेनत्रिविधः विभावाद्युपधानमहिम्नातन्म
यीभवनयोग्यंहिचेतः कदाचिद्विकसतिसत्वाविर्भावोविकासः। न्यग्भूतरजस्तमोगुणंहिचेतःसत्वोद्रेकप्रकाशा
नंदमयसंविद्विश्रांतिमासादयति। ततः सत्वभागप्रतिष्ठितः शृंगारस्तदाभासोपितामेवभूमिकामालंब
ते· अतएवशुक्तिरजतवद्भावोदयेपिदोषमहिम्नेवकाव्यमहिम्नातद्व्यंजनात्· तत्समानभूमिकयाहास्योरसः
प्रादुर्भवतीत्यभिसंधाय· शृंगाराद्धिभवेद्धास्यमितिभरतमुनिः। तेनविकासभूमिकौशृंगारहास्यौ· विकासात्प्रच्युतम
प्राप्तगुणांतरप्रादुर्भावंविच्छिन्नंचित्तमुच्यते· तत्रोचितविभावादिवैचित्र्यादाविर्भवद्रजोगुणस्यचेतसोविक्षेपप्र

च्युतिदशायां रौद्ररसोन्मेषः अत एव समानभूमिकयो रौद्राच्च करुणो रस इत्याह· यदा तु सत्वतमोनिमीळनेन केवल
रजःप्रतिष्ठं चेतस्तदावद्धुसुखव्यापारोन्मेषाद्विस्तराख्यामवस्थामासादयति· तद्भूमिको वीररसः तदवस्थामेवा
स्थामेवास्थायाऽद्भुतोपि प्रथत इति वीराच्चैवाद्भुतोत्पत्तिरित्युक्तं न्यग्भूतरजोगुणस्य प्रवृद्धतमसश्चेतसोऽवस्था
विशेषः ससंकोचं तमालंब्य बीभत्सः प्रादुरास्ते· तदेकभूमिकश्च भयानक इति बीभत्साच्च भयानक इत्याह। तेमी चत्वा
रश्चित्तावस्थाविशेषाः कथमविशेषणादेव संदर्भद्विवंतीत्याशंक्य विभागेनोत्तरमाह। कैशिक्येति· शुद्धिसं
कराभ्यां रीतिवदत्रापि षट् प्रकाराः। सुकुमारेति· चित्तद्रुतिकारित्वं सौकुमार्यं· सुकुमारावर्थसंदर्भौ यस्यामि
ति विग्रहः। एवं प्रौढार्थसंदर्भेत्यपि· चित्तदीप्तिविधायिता प्रौढिः अर्थसौकुमार्यादिना विशेष्यमाणसंदर्भः सुकु
मारत्वादिः शब्दालंकारतां प्रयोजयति· कोमलप्रौढो मध्यमः प्रकारांतरविरहाच्च मध्यमभारत्यादयो न संभवं
ति· शशिरुचिधिति· निर्मियमितान्तादिषु मुग्धांगनाचुंबनरसोत्सुकानामतिमनोज्ञाधररागसमर्पकेषु नाग
लतादळेषु लतो मानपरिग्रहे वल्लितकादिचुंबनविशेषार्थिनीनां कचग्रहसौभाग्यसुंदरे मल्लिकादाम्नि ततः स
वंगीणाश्लेषसौभाग्यार्पक चंदनरसेऽनंतरमीर्ष्यारोषवासनानिःशेषकेलियंत्रणारतोत्तुंगितानां सीधुपा

त्रे· ततः सर्वोपकरणजीवितसर्वस्वे प्रियतमे समकत्ततयैव दृष्टयः पेतुरिति· कुवलयिनीति युक्तः पाठः कु
वलयितेति पाठे विशेषणांगप्राधान्यविवक्षायां समासे गुणीभावस्यानुचितत्वात्· सेयं कैशिकी मसृणे शृं
गारादौ विनियुज्यत इति। गोयद् इति। ओजः प्रधानतया प्रौढः संदर्भः। यस्मादियमारभटी दीप्ते रौद्रादौ वि
नियुक्ता तेन युक्तं शब्दार्थयोः प्रौढत्वमिति· उत्तिष्ठंत्यादि इति। सर्वांगीणश्लेषसमुत्सुके प्रियतमे वहिर्व्यावर्त्त
नमंतरनुवर्त्तनं च मुग्धांगनाजातिरिति न्यायेन नीवीबंधकेशपाशसंयमार्थिन्या निर्भरकेलिखेदेन भुज
लतालसंलसत्येव न तु व्यापारयितुमपि शक्येति तत्कालकांतिपोषः। अत्र मसृणे परिसेवत्स्यौचित्येन
संदर्भस्य प्रौढिरुचितैव· दीर्घसमासो हि शृंगारादौ निषिद्धो न तु प्रौढिः। रेफहकारादिवर्णनिवेशात्तु को
मलता संदर्भस्येति· एवमुत्तरोदाहरणेष्वपि विशेषः स्वयमूहनीय इति। अन्योक्तीनामिति। लोके बिंबप्रतिबिंबयोः
प्रतिबिंबं चमत्कारितया प्रसिद्धमत एव वक्ष्यत्यात्मेदं ज्याय इत्याह· शब्दालंकारकांडे वाक्यानुकरणमेव प्रतिबिं
बवाचिना छायापदेन गुणवृत्त्या ख्यायते· तदेतदनुकरणमनुकार्यभेदादेव षोढा व्यवतिष्ठत इत्याह। लोकों
केति· छेकादीनां लोकविशेषाणामेवंशो भाकारित्वेन पृथगुपादानेऽर्थन्तिरितरानेकविचित्रतत्तदनुका

यपरो लोकशब्दः छेकाविदग्धाः पोढा स्त्रीपुंसलक्षणा सहजकेलिरिति प्रसिद्धा पोढा भुजिष्या दासी त्यन्ये

अत्र केचिदन्यच्छायायोनिजमपि काव्यं छायालंकारव्यवहारभूमिमादुः प्रकृतिपरिणामः परपुरप्रवेशः

खंडसंघात्यं चूडिकापरिमल इति पंचयोनिजकाव्यभेदाः तत्र किंचिद्विकृतार्थः प्रकृतिपरिणामः

यथा। धुअमेहमकुअरा तुब्बेणसमअहिय उण अविमुक्का ओ। एहपा अवसाहा ओणिअ अड्ढाणं वप

डिगआ ओदिसा ओ। यथा च। सिसिरपडिरोहमुक्क परिमुक्कत्तं पअअवलिअक्कं। इह रइअरपाअलि

अं वित्थरदिदिसाहिं कढ्ढिअं वणहअलं। अत्र काशदिशां विस्तारलक्षणं नमनाग्विकृतमुपलक्ष्यत इति प्रकृ

तिपरिणामनामायं योनिजकाव्यभेदः। भाषामात्रभिन्नः परपुरप्रवेशः यथा। देवाधिपो वा भुजगा

धिपो वा धराधिपो वा यदि हैहयः स्यां। संदर्शनं ते गुणकीर्तनं ते सेवां जलिं ते तदहं विदध्यां। यथा चास विमो

अण ज्जुणमिअं अमहिं दमवा मुदइ अअप्पाणं। सेउं जब्वि दंसणगुणकहामुतइ जणूप ज्जत्तं। अत्र

भाषामात्रं भिन्नमिति परपुरप्रवेशनामायं योनिजकाव्यभेदः। विकीर्णमसमाहारः खंडसंघात्यं।

यथा। द्वित्राण्यंवुजिनीदलानि सरसामुत्संगमध्यासते मोलो किं शुकशाखिनश्चिन्न चतुरानाविभ्र

तेकोरकान्।गर्भग्रंथिषुपंचषाःसुमनसो वध्नंतिचूतद्रुमाःसंप्राप्ताःप्रकटीभवंतिकुररीकंगेषु कूजोर्मयः।अ
त्रकाव्यचतुष्कादुच्छिघपादचतुष्टयंग्रथितमितिखंडसंघात्यनामायंयोनिजकाव्यभेदः।तावत्तमर्थ
मुपादायाधिकावापश्शूलिका·यथा·कमलमननंभसितत्रचकुवलयेतानिकनकलतिकायां।साचसतुकु
मारसुभगेत्युत्पातपरंपराकेयं।तथाच।उभौरंभास्तंभावुपरिविपरीतौकमलयोस्तदूर्ध्वंरत्नाश्मस्थ
लमपिदुरूहंकिमपियत्।ततःकुंभौपश्चाद्विसकिसलययेकंदलमयोतदन्विंदावींदीवरमधुकराःकिं
चू
पुनरिदं।अत्रस्थानेस्थानेधिकावापस्यप्रत्यभिज्ञानाच्छूडिकानामायंयोनिजकाव्यभेदः।वैधच्छायामा
त्रसंवादीपरिमलः।यथा अनेनयूनासहपार्थिवेनरंभोरुकच्चिन्मनसोरुचिस्ते।सिप्रातरंगानिलकंपि
तासुविहर्तुमुद्यानपरंपरासु।यथोच।यात्राप्रसंगादुपवीणयंतीतस्यांमहाकालमविप्रतिष्ठं।कृशां
गिवीणागुणासारणासुचिरात्कलाभ्यासफलंलभेथाः।अत्रसंदर्भच्छायामात्रमनुहृतमितिपरिमळ
भामायंयोनिजकाव्यभेदः।[illegible]तदूतिलोचनेमीळयित्वेत्यनेनलोकोत्तरयनुकारेणनयननिमी
ळनवदाशुभावितासमागमसमयस्य प्रतिपाद्यते·तथाचसुकुमारतरकांताजीवितांध्यवसा

११

याभिप्रायः प्रवासविप्रलंभाविष्टचेतसः प्रकाशितो भवतीति उपलक्षणं चैतत् वर्षाकाले चतुरो मासानित्य पिलोकोक्तिरेव। योहीति कांतामुखमेव जीवितसर्वस्वमभिमन्यमानस्तत्रालं प्रत्ययशालिनः पश्यूनि वप्रति शृंगारी विदग्धः किंसइति। नूनं त्रिजगद्वर्तिसकलार्थिसार्थकीकरणविख्यातकीर्तेः पारिजात प्रमुखस्य कस्यचिदेकस्तबकः सुधाभिराह्लादयन्नयमवलोके दृश्यतइत्यादि। दृष्टइति। कथमित्यादि नालदेकतानतामाविष्टः त्यसहस्रैवास्तामित्यादि संग्रहाणं कथयतावदित्यादिनाच पुनरादानमसमं जसं। उत्तमपदस्थानीयस्युवतिमनुकुर्वाणा उत्तमपदारोपितनीचयुवतिः। पिपिप्रियेति। अव्यक्तवृत्तिरूपं स्खलितजल्पितं। साभिप्रायेति। यद्यपि संपूर्णमेव काव्यं वक्राभिप्रायप्रतिछंदकभूतं। उक्तंच। वक्राभिप्रा यंसूचयेयुरिति। तथापि नास्मिन्नितरसाधारणतया वाक्यार्थगोचरमभिप्रायमावेदयत्येवकाव्यसनाथी करणत्वमवक्राभिप्रायविशेषप्रतिरूपकएकदेशनिवेशो दृश्यते। अतएवांगुलीयादिमुद्रेवमुद्रेत्युच्य ते। निरुक्तिमाह। मुत्प्रदायित्वादिति। मुद्युपपदेरातेर्द्दनिकर्मणः केरूपं। मुद्रेवपदादिप्रकाश्यध्वनिव्य वहारभूमिरन्येषां। तस्मिन्निति पदं प्रातिपदिकंकृत्तद्धितसमासरूपं। विभक्तिवचनयोः सामान्यवि

११

शेषभावेपि पृथक्पृथगभिप्रायव्यंजकतया निर्देशः। आस्तामित्यादि वचनसंकोचः संवृत्तिः। गुणवृत्त्यु
पाश्रयेणेति। निर्मल्यादिपदानामत्यंततिरस्कृतवाच्यानामतिविछायत्वादिलक्षणाद्वारेणध्वावएपवि
शेषध्वननात्सत्त्वहृदयतद्व्यावर्जकानां निवेशो दृश्यते। एवं। ताला जाअंति गुणा जाला ते सहिअएहिं
घेप्पंति। रविकिरणाणुग्गहिआइं होंति कमलाइं कमलाइं। तथा। अमृतममृतं चंद्रश्चंद्रस्तथांबुजे
मंबुजं मंबुजं रतिरपि रतिः कामः कामो मधूनि मधून्यपि। इत्यादावर्थांतरसंक्रमणादिना तत्प्रका
श्यो ध्वनिरनुसंधेयः। यत्त्वच्छ इति आदित्यकला एव प्रतिफलिताश्चंद्रव्यपदेशं लभंत इत्यागमः
तदाह। सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशं॥ दलयंति दर्पणोदरविहता इव मंदिर
स्यांतरिति। पूर्ववाक्येपकारित्वेनेति। देवे पीयूषाहृतितत्त्वांतरं तिग्मं धाम च कास्तीति च यदगाध
तया लक्षितमिति किल शब्दकराच्चितमभिधानं। तत्र किं संबंधमित्याकांक्षाविपूरकं तत्रास्तीत्या
दिवाक्यं। तथा हि। य एष आदित्यपथं व्याप्य पुरुषो दीप्यत इत्याद्युपनिषदर्थनिवेशनमभिप्रा
यपूर्वकमाभासते। एतेनान्येपि वाक्यप्रकाश्यप्रकाराः परिगृहीता बोद्धव्याः। पूर्ववाक्येपत्नभावितदि

१२

12

त्वमवसेयमिति। श्रियइति। बुद्धिरूपा कामधेनुः श्रियः प्रथयतीत्युक्ते न तथा प्रकर्षेयथोक्ते तु विशिष्टः
कर्त्रभिप्रायउन्नीयते। तथाहि। यथोदुंबरः सलोहितं फलं पच्यत इति कर्मकर्त्तरि फलोदुंबरयोरैका
त्म्यमवसीयते तथेहापि श्रीरूपमात्मानं बुद्धिः प्रकाशयतीति अत एव हि दुहिपच्योः सकर्मकयोरि
ति वाच्यकर्मविशिष्टस्यैव कर्तुः कर्मवद्भावः शिष्यते। ननु दुहस्नुनमां यक्चिणाविति यगभावोपि विशेषा
भिप्रायनियत एव रुणद्धीत्यागमरूपः सूते इति लुप्तः प्रमार्ष्टीति वृद्धि प्रयोजकः पुनीते इति = स्वरू
पेण विकृतश्च विकरणः आत्मनेपदपरस्मैपदयोरैकान्तरितो निवेशः श्रियइति प्रकृतिभागे इयङादे
शो विकारः विभक्तावपि विकारः विपद इति प्रकृतिरविकृता। विभक्तिस्तु रुत्वेन विकृता। यशांसीति द्वे अ
पि विकृते। मलिनमिति वैकल्पिकपरसवर्णविधौ द्वयमपि कृतं संस्कारशौचेनेति प्रकृतिरविकृता। प्रत्य
यस्त्विनादेशेन विकृतः तथा श्रिय इति मंगल्यं। विपद इति विपरीतमिति क्रमेण शुद्धा बुद्धिः कामधेनु
रिति मंगलपरंपरानिवेशनेनोपसंहारश्चित्रांशुकांचलइव प्रतिभासमानोनुबिंबमिव कामपि कां
तिमभिव्यंजयन्नुपलक्ष्यते। मंगलामंगलार्थपदपरत्वेनेति। मंगलामंगलेभ्यः पदेभ्यः परवर्त्तित्वेने

१२

त्यर्थः। विष्वंभरेति॰ अहंकारप्ररोहस्यपूर्वंगुणप्रयोजकत्वमुक्तं॰ इहतुकवेरभिप्रायविशेषस्यालंकारघट
कतेतिविभागः। अत्राशंसायामिति। गतेमितिनिष्ठाप्रत्ययेनभूततासेतनादाशंसाप्रती= =तावपिकथंप्र
कृतपोषइत्यतउक्तंसमुच्चयद्वारेणेति॰ तेनहितुल्यकक्षताप्रतीतौत्वंचेदंगीकृतरोषस्तदासिद्धमेवसमी
हितमिति॰ वक्तुरध्यवसायविशेषप्रती= =तौसमुच्चयएवमुद्रापदवीमारोहतीति। निषेधंसुबोधं॰ विधीति।
उक्तिरभिधा॰ साद्वयीभावाभावविषयत्वात्॰ तर्हिगौरयंनायंगौरित्यतः कोभेदइत्याशंक्यविधिद्वारेणवे
त्यादि॰ भावज्ञानंविधिः। अभावज्ञानंनिषेधः लोकेगृहीतव्युत्पत्तिबलेनभावाभावान्यतरसंवित्सर
णिमारुह्यकाव्येकगोचरेरसाद्यात्मनिपर्यवस्यतीभवत्युक्तिरलंकारइतिभावः। सोयंभावादिप्रपंचे
नषोढाविधिः प्रथमतइत्याह। विधेरिति। उपाधिर्विशेषणंविध्यधिकारौशुद्धभावभेदौनिषेधनियमौ
शुद्धप्रतिषेधभेदौ॰ विकल्पपरिसंख्येसंकीर्णभेदाविति। तत्राप्राप्तप्रापणोविधिः प्रसक्तप्रतिषेधोनिषे
धः क्रियाफलसंबंधोधिकारः तुल्यकक्षयोरेकबाधेनान्यसंबंधोविकल्पः व्यावृत्तिफलकोविधिर्निय
मः शेषविधिनिषेधनांतरीयकोविशेषनिषेधविधीपरिसंख्या॰ अप्राप्तौप्रापणवचनमिति॰ अप्रव

१३ त्तप्रवर्त्तनात्मको हि विधिः कथमितरापेक्षत्वे संगच्छते· अत एवोच्यते· विधिरत्यंतमप्राप्तावित्ति प्राप्तौ निवार
णमिति· रोषेण प्रसजत्प्रतीपाचरणं निवार्यते· विधिनिषेधज्ञानादिति· विहितनिषिद्धक्रियाज्ञानेन
15 तत्फलसंबंधयोग्यत्वमधिकारः। शुश्रूषस्वेति भूयिष्ठं भवद्भिर्गतिर्हि विहिते· मास्मप्रतीपं गमइ
ति भोगेषु तु त्सेकिनीति हि निषिद्धे· विधिनिषेधयोग्यता विधिनिषेधफलसंबंधयोग्यत्वं ग्रहिणी
ला पदप्राप्तिर्विहितक्रियाफलं· कुलाधी भवनं तु निषिद्धक्रियाफलमिति। सोयमिति। जात्यादय एव
पदार्थास्ते च विकल्प्यंते· कुतो जात्यादिना तद्व्यवस्था· वाशब्दः पाक्षिकभावमाहेति भावाभावसं
करः। अपार्थ एवेति। विशेषणसंगत एवकारः केवलविशेषणायोगस्यासंभवे व्युत्पत्तिवशेन तद
भावं व्यवच्छिंदन्योग्यव्यावृत्ताववतिष्ठते· पार्थ एवेति विशेष्यसंगत एवशब्दस्तदन्यस्य धनुर्धरता
रूपं विशेषणं व्यावर्त्तयन्नन्ययोगव्यवच्छेदद्योतको भवति। केवलमिति। अभिनंदनस्य नायोगं न
वान्ययोगं व्यवच्छिनत्ति· किं तु तत्संबंधं बोधयन्नात्यंतिकमयोगमत्यंतायोगव्यवच्छेदोभिधी १३
यते। पंच पंचेति। पंचनखेषु पंचमस्यानान्ये· कुचयोरस्याः कार्शिन्यं नवचनादावितिविशेषवि

धीशेषनिषेधमनुजानीतः वामेनन पश्यति दक्षिरोन तु पश्यत्येव· किमसक्किमशोभनं· यद्यस्मै न रोचते इतरन्नुसदेवेति विशेषनिषेधो शेषविध्यभ्यनुज्ञाविषयाविति। अयुज्यमानस्येति· पूर्वेप देकवाक्यतातः तो वाक्यैकवाक्यत्वमनंतरं प्रकरणैकवाक्यत्वमिति प्रबंधविर्वहणायावेत कविव्यापारः। तत्र गामभ्याजशुक्लां दंडेनेत्यादीनां लोके गृहीतव्युत्पत्तीनामेवयद्यपि काव्यानुप्र वेशस्तथापि नंगीभणितिसनाथान्यो व काव्यपद्धतिमध्यासते इत्यप्रहतानामुपादेयत्वेयत्रा पाततः परस्परमन्वयो न प्रतिभासतेतत्रावश्यं कविना स्वाभिप्रायप्रतिच्छंदकभूतविशेषनिवेश नेन विवक्षितवाक्यार्थप्रतीत्यस्खलनं विधेयमत एव वैचित्र्यादर्शकारता। तदिदमुक्तमयु ज्यमानस्येति· आपाततइति शेषः योजना अन्ययोपपिकरज्जकविशेषनिवेशनं तस्य विषयः। शब्दार्थौ· शब्दः पदं वाक्यं प्रकरणं प्रबंधः अर्थः पदार्थो वाक्यार्थश्च· विषय भेदात्सौढायु क्तिरित्याह पदं चैवेति· योगेत्यादौ द्वंद्वपरवर्तीपदं प्रत्येकमन्वेति यद्यपि पदाना मर्थद्वारक एव संबंधस्तथापि तदौपयिकविशेषः क्वचित्पदे व साक्षादवसीयते क्वचि

=पदसिद्धये=

योगो योगरूढिः कारणं कार्यकारणभावः निरूढाः प्रसिद्धाः पदसमुदायात्मकवाक्यैकदेशता। सिद्धये॥२

१५

त्यदार्थेपि त्यमिप्रेत्याह॰ विरुद्धानामिति॰ एवं वाक्यवाक्यार्थयोरपि × योगो योगरूढिः कारणं कार्यं कारणभावः। निरूढाः प्रमिताः पदसिद्धये॰ पदसमुदायात्मकवाक्यैकदेशतासिद्धये × वाक्यमध्यवर्त्तिप्रकृतरसानुगुणरससमर्पकं वाक्यांतरं गर्भः। तस्यैकदेशभूतस्तथाभूतो निगर्भः उक्तेरुपसंहारश्च नंस

व

14

वृत्तिः। तुल्यप्रधानभावानां युगपदेकार्थसंबंधः समुच्चयः आदिपदादन्वाचयादयः। यत्तदोरुद्देश्यविधेयगामिनोः आदिग्रहणादिदमेतददसां च क्रियाणामावृत्तिरभ्यासः विजातीयानामेकदैकत्र संबंधः समुच्चयः समभिहारो भृशत्वं प्रकर्ष इति यावत्॰ अतिमात्रतया प्रतिभासमानत्वमश्रद्धेयता॰ तदेतासां मुक्तीनामतिदुरूहत्वादाह उदाहरणमेवेति। जंभजित्पदं हृद्यं तत्त्वा योगिकं॰ तथा जंभजिद्विपइत्यपि समासत्वात्॰ तदेतदुभयं योगेनाति प्रयुज्यमानं च रूढिद्वयेन विवक्षितेरावतरूपे वस्तुनि नियम्यते॰ हयांगनेति॰ वडवापर्यायः आस्यमिति मुखपर्यायः कृतभुगित्यनलपर्यायः सेयं पदपरंपरापर्यायता प्रतिसंधानेनाभिमतवडवामुखानलप्रतीतिं करोति॰ मदस्य किं जल्को न्मेषे॰ तस्य कल्के॰ तस्याप्युद्गटतायां हेतुभाव इति कार्यकारणपरंपरा॰ नभः कटाहांगी॰ तस्यांगमेकादेशः कुहरं तस्यापि क्रोड इत्य

सु

१४

गांगिपरं पराचयथाभिमतपदैकवाक्यतानिदानमितितदेतद्याचष्टे· अत्रेति। परिस्फुरंतीकविशक्तिव्यं
जकतयासत्हृदयहृदयेषुप्रतिफलंती· नागेंद्रकरवदूरुः पार्वतीभागेदोर्बादुश्चदेवभागेकरिकुंभव
त्पीनःस्तनोदेवीभागेअंसःस्कंधश्चदेवभागेः एवंविधंत्वांपितु परमेश्वरस्यवपुस्त्वन्मुखे· एकविषा
णतयाकरिकरिणीसमाहारात्मनिवीत्ता महइति वाराह्याःपरिहासोक्तिः वाराहीवराहप्रकृतिभूतोमा
तृविशेषःइभवदनोविनायकः अत्रस्त्रीत्वपुंस्त्वयोःपरस्परपरिहारेणोपलंभाद्विरुद्धयोरपित्वेत्यि
तुरित्यनेनखुतिनिंदयोःप्रतिषेधेनरम्यताभीषणतयोर्योगव्यवस्थयामुखवपुषोःसादृश्येनाभिप्रा
यप्रतिबिं[illegible]बितेनयोजनाविहितेतितत्प्रतिपादकानांपदानामेकवाक्यतासिद्धिः। तदिदमाह अत्रेति·
जातिक्रियेत्यादिनाक्रमेणविरोधप्रसिद्धेर्गुणविरोधमुल्लंघ्यक्रियाविरोधोव्याख्यातः आघाटःसीमा·
वि गर्भोविवृतपूर्वस्तत्रैव आश्चर्यरसान्विष्ट्ध्वस्यवक्तुः पश्यतेतिवाक्यांतरंनिगर्भः गर्भेवाक्येनसमा
प्यमाणप्रकृतरसान्वयिनिरसेप्रकर्षाधायकोनिगर्भो गर्भोनिगर्भइत्युच्यते· तदिदंभावाविष्कारव
चीत्युक्तं· विप्रायप्रतिपाद्यते· संपन्नातेखुज्यतइत्यादिवक्तव्येकिमपरमित्यस्यसंवृत्तित्वेनयोजना·

१५ 15

एवंहिकियदस्यमहानुभावस्यमादृशाचरितमप्राप्यतेतदिहमौनमेवोचितमितिभूयान्प्रकर्षेविसीय
ते· यस्मादाविर्भूतकथाद्भुतमिदंयत्रैवचास्तंगतमितिवाक्यद्वयस्यपूर्ववाक्यगततेकार्थसमुच्चयं
वाचिनाचकारेणायाजनाव्यक्तेव· एवमादयइति· तद्यथा· वीथ्यंगानित्रयोदशप्रस्तावनापरिच्छेद्यानि·
संध्यंगानिविलासाद्यानिचतुष्षष्टिः· संधयश्चरूपकावयवभूतामुखप्रतिमुखगर्भविमर्षनिर्वहणाख्याः
पंच· प्रकृतरसावस्थारूपाणिचपंचैव· बीजबिंदुपताकाप्रकरीकार्याणितत्तत्प्रकरणप्रबंधरूपवा
क्येयेकदेशयोजनान्यवगंतव्यानि· तिष्ठेति· उपस्थितिसमयसीमामतिक्रामतिप्रियतमेतत्कालो
द्विगुणितोत्कंठातरलितांततःकरणाकदाचित्स्वागिवगर्भगृहद्वारितिष्ठति· ततस्तत्रानवलोकमाना
गृहांगणेभवति· तदनंतरंवेश्मनोबहिर्व्रजति· सोयंविजातीयक्रियार्थनानाधातुगोचरःसर्वको
ळेषुसमुच्चयेन्यतरस्यामितिलोटोमध्यमःपुरुषोनुशिष्यते· अतएवदर्शनावच्छेदभूतद्वारावस्थानादि
सामान्यवचनःसमुच्चयेसामान्यवचनस्येत्यनुशासनान्नियमितप्रयुक्तिरीदृतिरनुप्रयुज्यते· १५
नायकस्यसर्वथात्हृदयवैशसंसर्वथैवाश्रद्दधानाहूरंदूरतमरथ्याभागावलोकनार्थिनोशालांगृह

मारोहति· ततस्तस्मादुच्चैस्तमंगमट्टालकमनंतरं तस्मादुच्चतरां वलभीमुपरितनकुटीमिति· अत एव चा
नक्रियैवात्राचष्टेति क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोरित्यनुशिष्यते· अत एव चान्यथा
विध्यनुप्रयोगः पूर्वस्मिन्निति तस्यैव धातोरनुप्रयोगोपि· एवमथ नागच्छति नायके दूतीव्यापारः शरणं
यत्कुंगना यां स्वयं वा तत्र गमनमित्युपदिश्यते तेन तत्तदभिप्राय संवर्द्धकसंदेशप्रकर्षः सोयमाभीक्ष्ण्य
यैर्हि रुक्त्या व्यज्यते· अत एव लोटः समभिव्याहारो विषयो न तु घञादिवदभिधेय इति पूर्वाचार्याः
इति शब्दादधिकं चतुर्थवाक्यानुप्रविष्टमिति यावच्छेदेनावच्छिनत्ति सदिशा संदिशेति यावदिति· उक्ती
ति। उक्तिरभिधानमुच्चारणक्रियालक्षणा क्रिया सा सर्ववाक्यसाधारणी कथमलंकार इत्याशंक्य प्र
कारपदं· प्रकारो भंगीरूपता· लौकिकशास्त्रीयवचनातिगामी विशेषः स एव वैचित्र्यव्याप्तिमननुसंद
धानैरलंकारसामान्य उक्तः उक्तिरूपत्वाविशेषे कथमयमेव संगच्छतामित्यतो विभागप्रदर्शनव्या
भ जेन विषयविशेषादेव तद्रूपतामुपपादयति· संभवइत्यादि· तत्र बहिरसंभाव्यमानस्यापि प्रतिभा
निर्मितचित्रतुरगवत्प्रतीतिः संभवः तामपर्यंती संभावनात्मिका भणितिः सैव हि किंत्वस्ति काचिदप

णपिपदानुपूर्व्यांस्यांनकिंचिदपिकिंचिद्विवावसातीतिन्यायेनतत्तदर्थनिर्माणप्रवीणाययथास्मैरोच
तेविश्वंतथैवपरिवर्त्ततइतिव्यवहारकारणंभवतीतितथाविधएवविषयेशास्त्रप्रसिद्धप्रकारवैपरी
त्येनबाधवर्णनमसंभावना·तदुच्यते·इहतेजअंतिकइणोजअमिणमोजाणसअलपरिणामं·वा
आसुगिअंदीसइआमोअघणावत्तुछंव·अतएवेयंनिषेधरूपा·तज्जातीयव्याहत्तोधर्मोविशेषः
तंकंचिद्विदधानाकवेरभिप्रायविशेषमर्पयंतीनिषेधप्रसंगेविशेषभणितिर्विधिरूपाभवतीतित्ता
मवलंबमानाचमत्कारकारिणिविशेषेपर्यवस्यंतीवर्णनापह्नुवप्रसंगेसंकोचमवगाहमानावि
धौनिषेधरूपापर्यवस्यति·अतश्चितोपनतंविस्मयजनकमाश्चर्यंतस्यनिषेधेविधातव्येयत्किं
चिद्विधानंतदाश्चर्यरूपतामंतरेणकाव्यकक्षामारोढुंनक्षमतइतिनूनमनयाविस्मयार्पणमे
वसर्वस्वभूतमवलंबनीयमितिनिषेधविधिप्रसंगेनिषेधरूपाभणितिः·बहिरसंभाविनःकवि
दसतोविशेषस्योत्प्रेक्षाकल्पना·तामाश्रयंतीविधाननिषेधमात्रेणचरितार्थाकिंचिद्विशेषंविदधा
ति=इतिविधिनिषेधप्रसंगेसामान्यतःप्रतिषेधत्तिविशेषतश्चविधत्तइतिनिषेधविधिरूपाकल्प

ला

रभा३

नाभणितिः।सघइत्ति।केतकोदरद[illegible]नांङ्गावर्णंततःस्नोतोरूपतांनतस्तेनोपमितायाबहलतरबहि
र्भागस्यकलशीभिरुत्सेचनमनंतरंकिंचिदल्पीभूतमध्यभागस्यकरतलांजलिपुटेमनिंततःशे
षीभवत्तःसोंगस्यमृणालांकुरैःपानमितिवहिरसैभविनएवंविधंयंबिभ्रतीतिनिदर्शनयायोग्य
पदेनोत्प्रेक्ष्येत्यादिभिश्चमत्कारिणीसंभावनाजायते।कपेयमिति।स्वप्नस्यसात्ताल्कल्पनेसामर्थ्ये
मसंभावितंतदेवमेवोच्यमानंनतथाशोभामुन्मीलयतीतिकपेयमित्यादिप्रतिवस्तुनानिर्देश्यंव्यंग्या
रक्तिसुषमाविस्तारंकुर्वाणाभवत्यसंभव[illegible]णितिः:पूरीभांडभेदः।रेवतीति।दशनोच्छिष्टंचुंबितं।उच्छिष्ट
त्वीवयोनक्किंचित्पूतत्वंपावनत्वंवाहृष्टचरमितिहळिनेत्रपुटहळिनोर्विधीयमानंदेवताचरितस्यलो
कोत्तरतांगमयतीतिनिषेधप्रसंगेविधिरूपेयंभणितिः।आभरणस्येत्ति।अत्रचंद्रमुरवीदुग्ध
धवळनयनाबिंबोष्ठीकरिकुंभस्तनीत्यादिकविसमयप्रसिद्धवर्णनाप्रपंचप्रसंगेयथोक्तरूपेण
तस्यसंकोचोनिषेधः।तत्प्रतिष्ठाभणितिरलंकरणमेवानयाक्रियतइतिकांतिविशेषंव्यंजयंती
विधौप्रसक्तेनिषेधरूपाभवति।ज्योतिर्म्यइति।प्रियोहिनाप्रियमाचरतीत्युत्सर्गसिद्धाप्रियानाच

रणं देवगत्याशये संभाव्यमानमाश्चर्यमुन्मुद्रयत्सामान्यपरंपरया प्रेमाविष्टमंतःकरणमावेदयति। यदि
ज्योतिरादेस्तमःप्रभृतीनामुद्गमः स्यादपि प्रियादप्रियमिति सर्वथैव निषेधे विधातव्ये प्रत्यक्षपरिक
ल्पितस्यान्यथाकर्तुमशक्यत्वात्प्रमेयविरोधमसहमाना विधत्ते च निषेधति चेति निषेधविधिप्रसं
गे विधिनिषेधरूपा भणितिर्भवति। दृश्यमिति यद्यपि द्वाभ्यामेकेनाल्पीयसा च नेत्राभ्यां मनसा सुहृ
तेन च वयसो यौवनस्य दृश्यत्वविभावनीयत्वभोग्यत्वानि प्रतीतिमुखमवतीर्णानि तथापि जीवि
तसर्वस्वभूतायामितरकामिनीसाधारण्यमितरसाधारण्यमसहमानो दृगादिसामान्ये सहस्र
त्वादिकं कल्पयन्नसाधारणधर्मनिषेधसरणिमारुह्य विशेषविधिं विधत्ते। सेयं भणितिर्विधिनिषे
धं घटकद्वारविधिरूपा भवतीत्यास्तां विस्तरः। वाक्यमिति। एकार्थप्रतिपादनावच्छिन्नः शब्दसमुदा

प्रसंगे निषेध

यो वाक्यं तस्मिन्विषयभूते आनुपूर्व्येण ग्रथनं रचना सा कथमतिप्रसक्ताप्यलंकार इत्यत आह।
सम्यगिति। प्रकृतपरिपोषाधानलक्षणमौचित्यमापन्नेत्यर्थः। वाक्यत्वमर्थशब्दाभ्यां विशेषणवि
शेष्याभ्यां व्यवतिष्ठते। तेन द्वयोरेव गुंफना समाप्यत इत्याशयेन शब्दार्थयोरित्युक्तं। तत्र शब्दो द्विवि

धः वाच्युपाधिश्च प्रतिपादकशब्दोद्विरूपः पदवाक्यभेदात् पदं द्विधापययिभूतरूपमतथारूपंच

तदेतद्विवक्षावैचित्र्यमंगीकृत्याविर्भजते शब्दइति अप्रतिपादकः शब्दः शब्दपदेनोक्तः अर्थोवाच्यः

क्रमग्रहणमुपाध्युपलक्षणं तवेति राज्याभिषेकोत्सवजातहर्षायाः कराच्च्युतस्यसोपानपरंप

रासुस्खलतः कांचनकलशस्यमम्भामागप्राप्तियावक्रमेणोच्चरंतीशब्दमालानुकृतेतिप्रकृतायान्तु

गुण्यं एवंहिकरच्युतमपिनसंभावयतीतिकोपिमदप्रकर्षोव्यज्यते दिक्कालेति दिक्कालात्मतुल्यं

सर्वमूर्तसंयोगाश्रयतालक्षणंविभुत्वमाकाशस्येवतस्मिन्नर्थोक्तिप्रेयच्छब्दोयमुद्देश्यगामीनिवि

शतेतमुपजीव्यतच्छब्देनप्रतिनिर्देशोयुक्तः आकाशेविशेषेणचंद्रतारादितेजोभिभवसामर्थ्यंल

क्षणेनद्योततेभगवानादित्यइतियच्छब्देनतमुद्दिश्योत्तरवाक्येऽदसाप्रतिनिर्दिष्टवान् कर्णेति त्याप्र

तिफलितासूर्यकिरणासलिलमयेशशिन्येववसुधाव्यपदेशंलभंतेतत्रैवयच्छब्दोनिविष्टः तदुपनी

तमर्थमुत्तरस्तच्छब्दोविषयीकरोतीत्यादिअपामेवराशेश्चंद्रोजातस्तास्मापितृंवह्निस्तस्यसायंप्रातरा

हुतयेयजमानः सवायुनाजीवति सचपृथिवीगुणेनगंधंवहतीतिपूर्वपूर्वसंकलनेनोत्तरंवाक्यार्थ    तरो

रचनाविहितेति· यद्यपि चार्थगुंफे शब्दगुंफो ध्रुवभावी तथापि प्रथमानुसंधेयमर्थगुंफनमेवात्र प्र

१८ ने धानमिति तैर्व्यपदेशो युक्त इत्याशयवान्व्याचष्टे· अत्रेति· यदीयं शृंखलाज्ञान प्रतिसंधीयते कथं

परमेश्वरमूर्त्तेर्यो ऽशैलभ्यं तदिति भावः। नीलाब्जेति· पत्रदानेस्पर्द्धा व्यज्यते· सा च सादृश्यपर्यवसायि

18 नीति प्रतीयमानोपमा· इभकुंभपूर्वपक्षीकरणेन कुचाभोगस्य सिद्धांतभावोऽवगम्यते· तथा च व्य

तिरेको ध्वनितः अनुवादेनाप्युपमा प्रतीयते इषणेन व्यतिरेक इति प्रकृतपर्यवसाने समासोक्त्या

पत्रदानादीनां विदग्धत्वोद्दादिप्रसिद्धानां शब्दानभिधेय एव क्रमउपाधिभूतो ग्रथित इत्युदाहरणव्या

ख्यानग्रंथार्थः। करणाङ्घ्रिअ। केनचिद्विटेन शुकभाषामनुकुर्वता प्रियायां परिहास आरोबः सा त ध्यः

स्य दुर्विदग्धत्वमाकलयंती तदुचितमुत्तरमदात्· शुकप्रलपितानि किल शुकी जानाति नान्या न चा

हं शुकी· ततो विफलस्तवायं प्रयास इत्यर्थः। अत्र कुंतकीरपूंसशब्दाः शुकपर्यायाः। कणइल्ली वा

आडीशब्दौ शुकीपर्यायौ तत्रापि कीरशब्दस्तत्समः अन्ये देशीरूपाः तदेतेषां पर्यायाणां यथोक्तरूपानुगु १८

णानामेकत्र वाक्ये गुंफनमेव कविसंरंभगोचर इति· लोलल्लांगूलवल्लीति। लांगूलवलयितेत्या

दियथोक्तवाक्यविरचनमात्रेणैवप्रयोजनपरिग्रहे सिद्धे यदधिकानां लोलद्वल्लीप्रभृतिपदानामावाप
स्तेन विना नौचित्यानुप्राससिद्धिर्न च तया विना रसौचिती समाप्यते न वा तामंतरेण लांगूलादीनाम
भिमतास्तैस्तैर्विशेषाः प्रतीयंत इति पल्लवप्रतिछेवहि सरस्वती सहृदयानावर्जयतीति। वाक्यप्रतीति
मात्रार्थमुपात्तेषु पदेषु यः। उपस्कारः पदैरन्यैः पल्लवं तं प्रचक्षते· अपल्लवं तु यद्वाक्यं कविभ्यस्तन्न रोच
ते· प्रयुज्यते तथाभूतमुदीच्यैः कविगर्हितं· तदिदमाह· अत्रेत्यादि। वाक्यरचना तु महावाक्य एव
भवतीति· तथाहि· पतिश्वशुरतेत्यादिकमल्पान्तरमेव वाक्यं महतोर्थराशेः समर्पकमिति भावय
तां हृदयानां कविशक्तिरप्रत्यूहैव प्रकाशते· अतएव शक्तितिरस्कारोद्घाटं तावदभिधामध्यमाभिधाने
क्रमभ्रंशोपि तिरस्क्रियत इत्याह। अत्रेति। शय्येति। किंचिदेकं वस्तु बुद्धौ समाधाय तदधिकारप्रबंधरच
नायामधिकस्यांतरांतरा प्रवृत्तेर्योजना शय्या· पदार्थानां प्रस्तुताप्रस्तुतवस्तूनां· तद्वयोजनीयं शब्दा
र्थभेदेन द्विविधं· तत्र वस्तुवाक्ययोरेव योजना महाकविप्रबंधेषु दृश्यते अर्थस्तु प्राकरणिकार्थोपयो
गी तदनुपयोगी चेति द्विविधः द्वितीयोपि तिरस्कृतो तो तथाभूतश्चेति पूर्ववद्विभागवाक्यं व्याख्येयं· पदा

१९

19×20

र्थपदसिद्धार्थएवंवाक्यार्थमिति· सेयंसप्तर्षीणामिति· गौरीपरिणयप्रापकतया प्रकरणसंगतस्सैसप्त
र्षिवृन्दान्तः।इयमप्रक्रान्तस्येति।संवरणनिषादसंवादस्यपूर्वापरप्रकरणानुपयोगेपीतिहाससरूपेण
संगतिः।इयमतिक्रान्तस्यापीति।कदंबकुसुमोद्गमस्य प्रत्यक्षस्यवविरहिजनतातंकदायित्वसंभव
तीति कथमतीतस्यतद्रूपस्येत्युक्तंस्मृतिद्वारेणेति· संकल्पवशेनप्रत्यक्षायमाणस्येत्यर्थः एवमना
गतयोजनापिगुणादिनाबोद्धव्या· इयंस्वेति· स्वाहाकारप्रदानोहोमः तत्रसघष्ठिन्नेनशिरसाप्राण
शेषयोगात्पदाईमात्रेनिष्पादितेतदैवभूतकरुणासंतानशंतात्मनापरमेश्वरेणस्वेदाविष्कारवाची
हाशब्दःप्रयुक्तःतेनेवनिरंतरमुच्चरतास्वाहापदंसिद्धमिति· इयंपूर्वेणास्नेत्यादिसुगमं· अत्रश्रावणा
दीनामितिप्रकीर्णविकीर्णमनेकत्रप्रतीतमिति यावत्· तद्द्विविधंकालतोदेशतश्च· अत्रहिश्रावणा
दिमासचतुसप्तकस्ययुगपदसंभवतएकत्रविरहिणीशरीरेयुगपद्भावोनिबद्धःसगुणावृत्तिव्यपाश्र
येणश्रावणादिपदेप्रतिपाद्यमानःप्रवासविप्रलंभप्रकर्षमावेदयतीति· एवंदेशविकीर्णघटनाप्युदा
हार्यापिया अमृतममृतंचंद्रश्चंद्रस्तथांबुजमंबुजंरतिरपिरतिः कामःकामोमधूनिमधून्यपि।इतिनभज

११
२०

तेवस्तुप्रायः परस्परसंकरं तदियमबलाधत्ते भावान्कथेसकलात्मकान्। यस्त्वत्र सिद्धादिभेदः कश्चि
दुपवर्णितिः स तथा न च मत्कारकारीति ग्रंथगौरवभयादुपेक्षितोस्माभिः। तत्तदनेकासाधारणरूपा
ण्यपि प्रकीर्णानि प्रकीर्णपदेन ग्राह्याणि। तेषामनुक्तान्यतयाचोपग्रहोपि प्रयुज्यत इत्याह। प्रकीर्णं
ग्रंथश्चायमिति। व्याख्यानांतरप्रयोजनमाह तेनेति। शब्दस्यार्थप्रतिपादनशक्तिरभिधा। सा त्रिधा
मुख्या गौणी लक्षणा च। तासु मुखमिव प्रथमं यस्यामर्थः प्रतीयते सा मुख्या। तथाभूतार्थतद्भावा
पत्तिश्च। तत्र अवांतरार्थसंबंधविषया तथाभूतार्था यथा खात्मेंदुवह्निपवनार्कमहीपयोभिरष्टा
भिरेव तनुभिर्भवता समस्तं व्याप्ते जगत्यपरमिच्छति यो त्र वक्तुं कोन्यो गतस्तत्र पतया सदृशोस्ति
तेनेति। सैवार्थत्तिवृर्स्वर्थसंबंधविषयातद्भावापत्तिः। अतथाभूतस्य तथात्वापादनं हि सा। अत एव ख
तोन्यतोवाख्याथोवच्छिन्नस्य साक्षादभिधानशक्तिरेव मुख्येत्याचार्याः। यथा। कमलाअराणमणि
आहंसाउड्डाविआणा अपिउच्छाकेण विगामतडाएअ भवं उत्ताणाअं बूढं। गुणव्यवहिता गौ
णी। गुणनिमित्ता उपचारनिमित्ता च। तत्र द्वयोर्यत्र द्रव्यवचनयोः सामानाधिकरण्येन वैयधि

२१

करण्येनवाप्रयोगेविशेषणविशेष्यभावान्यथानुपपत्त्याप्रतीयमानाभिधीयमानगुणद्वारकसंबंधोभ
वतिसागुणनिमित्ता· यथा पद्विवक्कवमस्स पुंजेलावसाकुडेअणंगगअकुंभे। पुरिससअहिअअमरिए
कीसरवथणंलेंतीयणेवहसि। मुख्ययागौण्यावान्यविशेषणस्यान्यत्रप्रयोगउपचरितासापिगुणयो
गमुपजीवंतीगुणवृत्तिरेव· एतावांस्तुविशेषोयद्गुणनिमित्तायामभिधेयगुणयोगइह तुस्वाभिधेयविशे
ष्यगुणयोगइति· यथा। परार्थेयःपीडामनुभवतिनिर्व्याजिमधुरोयदीयः सर्वेषामिहखलुविकारोप्यभि
मतः। नसंप्राप्तोवृद्धिंसयदिभृशमत्तेत्रपतितः किमिक्षोर्दोषोयंनपुनरगुणायामरुभुवः। स्वार्थसंबंध
व्यवहितालक्षणा· तदुक्तंअभिधेयाविनाभूतप्रतीतिर्लक्षणेतिया। सैषाविदग्धवक्रोक्तिजीवितंवृत्तिरिष्य
ते· साद्विधा· शुद्धालक्षितलक्षणाच· तत्रसाक्षात्स्वार्थसंबंधाविनाभूतविषयाशुद्धा· यथा· यत्नालीदळपाक

छ

पांडुवदनं· अभिनवकरिदंते[illegible]दपांडुःकपोलइति· यया पूर्वपूर्वलक्षितमेवलक्ष्यतेसालक्षितलक्षणेतिके
चित्· यथा मधुद्विरेफःकुसुमेकपात्रे· भीमोभी·मपराक्रमइति· अत्रहिद्विरेफादिनाशब्देनलक्षित
एवभ्रमरप्रभृतिर्लक्ष्यतेनतुकुरयादिः। अन्येतुलक्षणाव्यवहितालक्षणालक्षितलक्षणेत्याहुः। य

२१

ए

षा·सुवर्णपुष्पां पृथिवीं चिन्वते पुरुषास्त्रयः। शूरश्च कृतविद्यश्च यश्च जानाति सेवितुं। तद्भावापत्त्यादि विशे

षसमभिव्याहारेण सुखादिशब्दाः तदितरतया भूतत्वागोचरा इति पूर्ववद्याख्येयं· क्व पुनः परेकार

त्तिरित्यत आह अत्रेति· एक्कहि अछिहिं अस्महिं महि अलसत्छेरे गंडत्छ ले अंगहिं इत्यादितः षडाधारव

चनाः। अत्र यद्यपि गंडस्छल पदं गोणमेव तथाप्यनादि प्रयोगयोगितया मुख्यकल्पमिति षट् स्वाधा

रवचनेष्वित्युक्तं· अंगादिपदानि च स्वार्थविशिष्टान्यपराण्येव प्रयुक्तानीति मुख्यैव वृत्तिः। एवं मुग्धा या इति सं

बंधिपदेपि· सुहछितिलवणे मुहपंकअसरि इति द्वावाधारवचनौ शेषौ· अत्र तिलवनसरःपदयोः स्नेहनि

र्भरत्वसरसत्वलक्षणगुणद्वारकैव सुखासिका मुखपंकजयोर्वृत्तिः। मुखपंकजस्य रसीत्यत्र यद्यपि

भ · पदद्वयं गोणं तथापि पंकजपदस्य वृत्तिरभिधातुल्येति न कविसंरंभगोचरस्तेन व्यवहारो युक्तः· सावत्थभद्द     ए

वअ माह वमग्गसिरु इति चत्वारो मासवचनाः ते च स्वार्थसंबंधव्यवहितं वर्षप्रभृति समुदायं लक्ष

श्रावणा     यंतीति· वक्ष्यमाणरीत्या शरीरे वर्षादयः षडाधेयवचनाः ते च विरहवती युगपच्चासंभवदवस्थितयो ज     शरीरे

दा     लादिसंपर्कप्रवृत्ति दिस्वस्वनिमित्ताध्यासेन प्रयुज्यमानास्तद्भावापत्तिरूपां वृत्तिमासादयंति· अस्याश्च

प्रवृत्ति

२२

विवर्त्तपरिणामाध्यासादयः षट्प्रकारा गौरवभियान दर्शिताः श्रुतार्थानुपपत्तिमूला कल्पना श्रुतार्थापत्तिः। ए
जादेरासिते आवासितशब्दे मुख्य एवैष विशेषणतया रूढः स स्वविशेषगुणाव्यवहिते यंतिरे प्रयुक्तो गो
णीवृत्तिमत्तु नवत्र वसंतादेरपि विशेषणतामासादयति। लक्षणाव्यवहिता लक्षणालक्षितलक्षणा। सा क
थमावासिते तिशब्दे संपद्यत इत्यत आह सउपचारेणेति। कथंचित्सारूप्येण श्रावणादिषु प्रयोगादुपचार
स्तमुपजीव्य प्रयुक्तः स्वार्थाविनाभूतं महत्त्वादिकं प्रकृतेषु लक्षणया संक्रामयतीति आद्यलक्षणातद्व्य
वहितां द्वितीयामाह प्रस्तुताया अपीति। आवासितस्यापि हि यथोक्तविशेषणस्य परदुर्गग्रहणादौ महा
ननुबंधो दृष्टः स इह प्रस्तुतायां विरहवतीसंतापलक्षणायां प्रवृत्तौ लक्ष्यत इत्येकलक्षणाव्यवधानेनेयं
लक्षणा। एवं लक्षणाद्वयव्यवधानेनापि भवतीत्याह। तेचेति। श्रावणादयः स्वधर्मसंपदो निरंतरवर्षणा
देः स्वार्थाविनाभावेन लक्षितायाः प्रत्यासन्नाः सदृशीं तेषां लोचनादीनां धर्मसंपदश्रुप्रभावादिलक्षणा
लक्ष्यत इति द्वितीयालक्षणा। तत्पुरःसरां तृतीयामाह। असावसाविति। एवं लक्षणात्रयपूर्वापि लक्षणा बो
द्धव्येत्याह। क मितरीति। स्नेह प्रतीत्यानुविभावादिसंवलितया रसो व्यज्यते न तु लक्ष्यत इत्यन्यत्र वि

५

९७

२२

स्तरः। कस्याः पुनः स्वधर्मसंपदः प्रत्यासन्ना कान्तद्धर्मसंपदित्यतो विवेचयति तत्रेति· यदि श्रावणादिपदेषु
समुदायलक्षणा न स्यात् तदा मासानुपक्रम्य श्रात् नामभिधाने प्रक्रमभेदो भवेत्· न भवेच्चतन्न हेतु प्रतीत
श्रतु संपत्स्यतीति· क्वचिदिति युक्ते च समुदायलक्षणा· एताभ्यामिति प्रत्येकं न तु पदद्वये लक्षणा संभवति· वि
भक्तिश्रुत्येति· सप्तमीप्रथमाविभक्तिभ्यामाधाराधेयभावः स्वशक्त्या प्रतिपाद्यते तदनुपपत्त्यार्थांतरलक्षणा
प्रादुर्भवति· एवं चैत्रवैशाखसमुदायात्मनो वसंतस्योत्तरावयवो वैशाखः तद्वाचके पि माधवपदे समुदा
यलक्षणा भवति। प्रशंसावचनस्यापीति· गर्भीकृतसारूप्या हि व्याघ्रादयउपमेयवाचिभिः समस्यंते· तत्
सारूप्यं प्रकर्षलक्षणमेवेति प्रशंसापरत्वे स्थिते नाभिधेयमप्रतीत्य सारूप्यं वा रूपांतरं वा प्रत्येतुं न
शक्यत इत्यभिधेयप्रतीत्यनुनिष्पादिनी घंटानुस्वानसोदरा स्वधर्मसंपद्यथोक्ता प्रतीयते· स्वने किळश
रदाकाशकुसुमहंसादिकास्वसंपद्विस्तार्यते· न मुखचंद्रादिवत् मुखवासिकातिळवनयोः सादृश्यप्रतीतिर्न
च तदभिधीयमानं किंचिदत्रास्तीति इच्छति· का पुनरिति· मा भूत्तथा प्रसिद्धिः कवेरभिप्रायारूढा तु प्रतीयत
इत्युत्तरमाह। योग्यमिति· न स्नेहो नाम द्वयोरेकः कश्चिदस्ति न चानभिधीयमानमपि सादृश्यस्य शब्दसामा

न्यमा। अयतइत्यतः प्रकारांतरमाह अभिसारिकाणां चेति॰ कथमेतदवगतमित्यत आह यदित्थमिति॰ न
नु कमलिनीशरीरस्यात्र बहुमानगोचरता प्रतिपादिता न तु तिलवनस्येत्यत आह॰ अत एवेति॰ उप
मानोपमेययोर्द्वयोरपि कामिनीबहुमानगोचरतां वितरंती शिशिरेणसंप्रतं तिलवाटिकालवनमपि
वर्त्ततइत्यभिप्रेतीतिभावः मुखमर्द्धं शरीरस्येत्यादिन्यायेन मुखशब्दः प्राधान्यं लक्षयति ततो मुखशब्दः पं
कजसरसि शिशिरइतितद्भावापन्नाहेमंतस्यापि ऋतुषुप्रथमतया प्राधान्यमेव द्योतितमिति॰ तदुक्तं।
पडिकम्मदूइपेसणमाणग्गाहणेसु भासुर = पकुप्पंतो। हेमंतिओ सुहा अइमलिणमिअंको विकामि
णीण पओसो॥ ॥काकुस्वरेति॰ किंचिदेकपरतया प्रवृत्तमुच्चारणमर्थांतरविवक्षया यदन्यथा क्रिय
ते सा पङ्क्तिः। अन्यथाकरणं च काकुप्रभृतिभिः षड्भिरिति॰ तत्र भिन्नकंठध्वनिर्धीरैः काकुरित्यभिधी
यते॰ सा द्विधा॰ विधिकाकुर्निषेधकाकुश्च तयोर्निषेधपरोच्चारणान्यथाकरणेन विधिपर्यवसायिनी
विधिकाकुः। यथा। शल्यमपि स्खलदंतः सोढुं शक्येत हालाहलवद्दिग्धं। धीरैर्न पुनरकारणकुपितखल
लालीकटुवचनं। एवं विधिपरोच्चारणान्यथाकरणेन निषेधव्यंजिका निषेधकाकुः तामुदाहरति। यथा

२२

तियदिदूती प्रियातदाहमपिप्रियेत्यादिक्रमजूत्तयाशृंगनायकविषयाकृत्रिमाप्रीतिः प्रतीयते काक्कातुत
त्रैर्वेनाहंप्रियेतीर्ष्यारोषः स्वराः प्लुतादयउदात्तादयश्च· नामीषांवेदइवकाव्येमृग्यात्र्प्रयोगइतिकिंचिदु
दाहरति· सुभ्रुत्वमिति· चरणतलाग्रपतितेमयिदृष्टेसति त्वंप्रसीदेतिदीर्घमात्रोच्चारणेकुपितकांता
प्रसादपरत्वंयथोक्तप्लुतकरणेतुदूराह्वानादेतदनुशासनात्कुपितदृष्टिसंबोधनंतु द्विरूपजायते·
अशनापासनादयोहिद्वयोः साधारणाएवेतिश्लेषोपदानमेवेति· एवंह्रस्वस्यदीर्घकरणेनदीर्घस्य
ह्रस्वकरणेनार्थांतरप्रतीतिरवसेया· यथाविश्वामित्रोविश्वानरइतिऋषिराजर्षिविशेषौप्रतीयेते· य
थायुवतिसंबोधनप्रतीतिः एवमुदात्तादयोपियथादर्शनमुत्प्रेक्षणीयाः। शृंखलाभंगः परिवर्त्तकश्च
र्णमितिचत्वारश्छेदाः तत्रपूर्वापरवर्णानामन्योन्यसंकलनयास्थितिः शृंखला· यथा· कांतारतरुत
लासितमृगयुवरचितांतरेतिपङ्क्तिस्तद्प्रियासंभोगमणितहर्षितलुब्धकप्रचुरछन्नमध्येतिप्रतीयते· से
यमन्योन्यवर्णसंकलनयाशृंखलेत्युच्यते· एकस्यशब्दस्यमध्येविछेदेनद्वैधीकरणमात्रंभंगः तमुदाहरति।
सर्वेति। मयाविरहितेत्येतावतिसमुदायेमद्वियोगवती त्वयादृष्टेत्यहमकामावस्थाविष्टस्यपुरूरवसः पर्व

उ

बध

त्तविषयंप्रश्नवाक्यंभवति·यदातुमयेतिविछिद्यपूर्ववाक्यसंबंधिक्रियतेतदात्वयाविरहितासतीमयादृष्टे
तिपर्वतस्यान्तरवाक्यंसंपद्यते·वर्णांतिरकल्पनापरिवर्तः यथाकलिकामधुगर्हणेति·अत्रयथाश्रुतवर्णप
रिग्रहेकलिकामधुनोगर्हणानिंदेतिप्रतीयते·यदातुकलिकामधुक्‌अर्हणेतिवर्णांतिरकल्पनयाच्छेदस्त
दापूजैवकलौकामधेनुरिति·पिंडान्तरविभागश्चूर्णं·यथापश्यसलिलंपयोधेर्द्दूरसमुन्मुक्तशुक्तिमीनां
कांतमिति·अत्रयथाश्रुतेदुःखेनरसनीयमुक्तांतशुक्तिकोषंमत्स्याकितपर्यंतमितिप्रतीयते·य
दातुद्दूरसमुन्मुक्तशुक्तिमीनांकांतमितिपिंडचूर्णनेनछेदःनदात्यंततहर्षयुक्तेतित्यक्तशोकेतिचसं
बोधनद्वयंकलस्यप्रतीयते·येनेति·ध्वस्तमनोभवेनदग्धकामेनबलिजितोनारायणस्यकायः
पुरात्रिपुरदाहव्यतिकरेऽस्त्रीकृतःशरतांनीतःगंगांभागीरथींदधे·अंधकोदैत्यविशेषस्तस्यच्छ
याविनाशःबर्हिपत्रोमयूरवाहनःकार्त्तिकेयःशशिमच्चंद्रकलांकितंशिरःविश्वमोहछिदुरस्यहरइति
स्तुत्यंचनामलुजंगाएवहारवलयानियस्यसर्वदासर्वकालमिति·उमाधवपक्षे·माधवपक्षेतु·ये
नध्वस्तंविनाशितमनःशकटंअभवेनसंसारबंधरहितेन·बलिंजितवान्यःकायःसपूर्वंसमुद्रमथ

नावसरेऽस्मत्तरहयाकुदेत्यव्यामोहनायस्त्रीरूपतांनीतः अगंगोवर्द्धनाख्यंगांपृथिवीमेकार्णवमग्नामुद्धृतवान्· अंधकायदुविशेषांस्तयोनिवासःबर्हिणोमयूरस्यपत्रंपिच्छंतत्प्रियःबर्हिपिच्छकृतापीडमितिगोपालध्यानेगोतमेनाभिधानात्· शशिनंमथ्नातीतिक्विपूत्राशिमत्राहुः तस्यशिरोहरइतिस्तुत्यंचनाम·भुजंगहागरुडःसइष्टोयस्य·खेशब्दब्रह्मणिलयोयस्यसतथा·सर्वदोयावदभिमतप्रदः। ननुविभिन्नरूपाणांशब्दानामुच्चारणेतत्रतयाश्लेषएवायंनपरिभिद्यतेत्यत आह। तयोश्चेति·श्लेषोहिश्लिष्यमाणयोःपरस्परसंबंधेभवति·सचसंबंधःरूपतात्पर्यसंबंधलक्षणोवाअंगांगिभावोवाउपमानोपमेयभावोवायथायोग्येवस्यते·नचायमेकोत्राभिमतःकिंत्वेकपरमेवोच्चारणेपदभेदेनार्थान्तिरंगमयतीतिपरिभिद्यतिरेवेयं। एतेनसमासयुक्तिसमासोक्तिभ्यामपिभेदउक्तः तत्किमुच्चारणंतत्रतानास्त्येवेत्यतआहश्लेषोपसर्जनेनेति·यत्रहियस्यप्राधान्येनविवक्षातत्रतेनव्यपदेशोयुक्तःअतएवविवक्षांतरेणश्लेषव्यवहारोयत्रसमर्थनीयएव·एवंहमेनेति। अत्रसर्वपदानामर्थान्तिरसाधारणतयानतावदभिमतपरिमाणविशेषप्रतीतिरुपजायतेयावदुच्चारणसहकारिभूतप्रसा

पासे

२५

रितकरद्वयकोषप्रसृतिमिदंगुलिप्रसारितांगुलीगणेनास्वरूपाभिनयप्रतिसंधानंनभवति·तेनाभि
नयपंक्तिरियंसाक्षादिववस्तुस्वरूपबोधिकाक्रियाभिमुख्यनयनादभिनयइत्युच्यते·तदिद
माहतत्रयान्नूतेत्यादि·अपदेशोपीति·आत्मनिर्देशिकाक्रियाऽपदेशः·अस्याभिनयविशेषत्वेपि
कीतिकरतयापृथगुपादानं·यावच्चस्वरूपसमुच्चारणविशेषणंनानुसंधीयतेनतावच्छ्रीप्राप्ति
धर्मयोःकारणविशेषःप्रतीयतइति·यस्यारिजातमितिकीतिश्छायासाअप्रतिहतरूपापदवद्द
र्तेषुनसंभवतीतिश्रुतिरूपाख्यते·तथाहिअवलंबनमित्यत्रद्वितीयचतुर्थस्थानस्थयोर्वका
रयोःक्रमेणांतस्थपवर्गभावानुसंधानेऽवलंबनमित्येकपदताद्यंत्राणहेतुमपश्यदित्यर्थःप्र
तीयते·यदातुद्वितीयेऽवलंवनमित्यत्रतयोरेवपवर्गांतस्थभावानुसंधानंभवतितदाबलंव
नमितिच्छेदेनपदद्वयसंपत्तौबलरहितंसततवनमरण्यंययाविगत्यर्थांतरप्रतीतिः·रुपजायते·त
दिदमुक्तंपदेपदद्वयेचेति·अपश्यतशयनमोजनश्शून्यंशयनंशीः·अदनमत्·निर्ज्जरसंभो
गेःनिर्झरजलमात्रोपयोगैरतएवबलरहितं·अत्रचयमकेनसंसृष्टिरस्सबोद्धव्या·आर

य

२५

त्तिमाद्यययमकमन्यथा भविष्यति ।अपरेपुनरिति · अन्यथेत्यतः परमपिशब्दो ध्याहार्यः पादाद्यन्यथाक
रणेनापि हि प्रकृतमुच्चारणमेव विशिष्यते · यदाह। पूर्वोक्तिसूक्तस्येति · अत एव श्लोकान्यथाकरणेनपत्ति
तिर्नसंभवति · तेन प्रागुक्तभेदैः सह द्वादशप्रकारापत्तिरितितात्पर्यं · यद्यपि च पदाद्यन्यथाकरणमपि
पदभेदप्रकारएवतथापिन तत्रपूर्वोक्तत्यागइह तु तत्परित्यागेन पदांतरकल्पनमित्येतावान्विशेषः
तत्रपदं विभक्त्यंतं विशेषणविशेष्यभेदेन द्विधाक्रियतेइत्याह पद्यान्यथाकरणं द्विधेति · एकं तद् इति।
साहसे प्रछन्नाभिसारलक्षणे · प्रकाशात्प्रछन्नोगरीयानितिन्यायात् · दिवास्वभोगिसोदरा · क्रियावल्लु
सुणा · गौरितरेति · घरूपेत्यादिना पूर्वपदह्रस्वः एतेषां च पदाद्यन्यथाकरणानां परस्परसंकरोपिभव
तीत्यावेदयति · पादस्याईस्य चेति · भाषाभेदेन कथंस्त्रीपुंसवचनतागम्यतइत्यत आह तदेतत्सौ
रसेनीति। विभागन्यूनतामाशंक्य यथोक्तप्रकारेण समाधानमभिसंधायाह। सेयमेवं प्रकारापत्ति
त्तिरिति॥ ॥ अथावृत्त्युपजीविनोलंकारालक्षयितव्याः तेषां समग्रकाव्यपर्यंतावृत्तिसमाश्रयणाद्य
मकं प्रधानमित्याशयेनाह। विभिन्नेति · विभिन्नार्थेत्यर्थाभेदव्यतिरेकपरं · तेन द्वयोरेकस्यवानिरर्थ

२६

कत्वेपियमकमुपगृहीतं भवति· एवमपिसरोरमइत्यादावतिप्रसंगइत्यत उक्तमेकरूपेति· रूपमानुपूर्वी·
विभिन्नार्थाचासावेकरूपाचेतिविग्रहः विविधधवेत्यादावेकवर्णावृत्तावप्यावृत्तिसमुदाय एवयमक
मुल्लिखतीत्यभिसंधायसंहतेरित्युक्तं· विभिन्नार्थैकरूपायावर्णसंहतेर्यावृत्तिः सायमकमितिव्य
वहितेनान्वयः आवृत्तिर्द्विधा· अनावृत्ताव्यवहिताव्यवहितावेति· सामान्यतोविभजते· अव्यवेतेति· व्य

वे

वायोव्यवधानं· तदेतदुभयमपिस्थानादिभेदेनत्रिधाभवतीतिपूर्वोक्तोनुवादपूर्वकमवांतरविभागमा
ह तदिति· पादस्यादिमध्यांताः अर्थादेतेषुविशेषतोनुल्लिखदस्थानयेमकमुक्तं भवति· एतदपिद्विधाव
तुरादिपादविकल्पेनविषयतोभिघतइत्याह चतुःस्थीति· आदिश्चमध्यंचांतश्चेति आदिमध्यांतास्त्र
यः शुद्धाः मध्यांतोमध्यादीआद्यंतोआदिमध्यांताश्चेतिमिळिताश्चत्वारः संकीर्णाः सर्वतइति· सार्वविभ
क्तिकस्तसिः एवंपादविकल्पानामाद्यादिविकल्पानांचपरस्परयोजनेन्येपिबहवः प्रकाराग्रंथगौर
वकारिणोभवंतीत्याह अत्यंतेति· नचकगोरनीरसत्वादवश्यवक्तव्याइत्याह।दुष्कराइति।शिष्यव्युत्पत्त
येतुकतिपयेदर्शनीयाइत्याह तत्रकेचनेति· राजीवराजीपद्मपंक्तिस्तद्वणलोलाः सस्पृहाभृंगायत्र

२६

तं॰ यतस्तरुपंक्तिभिरुछं घर्मं मुछंतमपहरंतं॰ कांतो मनोज्ञोऽलकांतश्चूर्णकुंतलस्तच्छायासांताः यस्माद्धंतो
भिः राद्धसेरक्षोभितमधर्षितं॰ अत्र प्रथमे पादे पूर्वं सार्थकमपरमनर्थकं द्वितीयादिषु द्वयमपनर्थकं॰ ए
वमन्यत्रापि यथायथमवगंतव्यं॰ आकरिभिः प्रशस्ताकरयुक्तैः करिभिः परिणतिक्रीडासक्तैः विविधेभ्यः
कामेभ्यो हिताः महितं पूजितं जघनावेगवतीः अनीरशनैः ननिर्गतादूरीभूतारशनाः क्षुद्रघंटिकायेभ्यः कां
चीगुणयुक्तैः तेनस्थपुटकर्कशरत्नादिरचनया सिंधुव्यथापोषः शनैर्मंदं घनैः मांसलैः अभितो विततं प्र
वृत्तोविततं सर्वतो विस्तीर्णं॰ फणभृत्तो कुलैस्ततं व्याप्तं॰ लवंगबकुलनामतिसुरभिशीतलतयाफण
भृतां प्रियत्वं॰ घनाघनो मेघस्तदाभुः श्यामः महीपृथ्वीतस्यां महीयानूपूज्यः धराधरः पर्वतः तदाकार
ग्रहाः वह्निसमागतं सततंद्रुतं विलीनमत एव द्रुतं शीघ्रं महीं गतं पृथिव्यां विस्तीर्य पतितं अहीनयाधुत्या
रोचितं शोभितं॰ चितं निविडं नसन्निवेशेनस्थापितं समंततात्सवतः समंसलक्ष्मीकमस्थपुरं वा॰ परैः
शत्रुभिः परैः श्रेष्ठैरनिराहतं यदासीत्त देववह्निनाहे ममयं पुरमगोपुरं अपगतद्वारं महीं चगतं क
तमिति संबंधः उदयउद्भवो विस्तारवत्स्वरूपः तद्युक्तैमुदयि॰ घनं मांसलं॰ नवेनतीर्थेनरजसातन

२७

कृता· स्त्रीरजः शास्त्रयोस्तीर्थं· सुमनसां कुसुमानां अनः शकटं तेन· सदृशो सुमनसां मनसामिति पा
ठे सुमनसः सत्हृदयास्तन्मनसां सदृशैः संवादिन्यो· घोष्यकुश्चघुल्लघावापृथिव्यौतयोः रूमालव
णाकरः लावण्यविश्रांतिस्थानत्वात्· सीमामयादितस्यामासन श्रीलः मानंपरिमाणातिशयः मा
नः पूजावा तद्भूमिः फणिवल्लभुजंगसमुदायः तस्ययद्दलनं तेनोद्भाविनीयाराजीरेखा तया विराज
नशीलं· हारीतोः पक्षिविशेषाः सघुक्तैः परिसरसंगिणि स्तीरमार्गः तत्रास्त्यमालेः त्विषमालासन्निवेशो· स्वं
रूपतामापन्नैरितियावत् ईदृशैस्तमालैर्हारी मनोहर इति संवंधः दिवादेवाः देवासुराः तैरमृतलाभेना
न्तरवस्थानेनचान्तारत्रायस्मात्सतथा· कृतभवः संपादितोद्भवः नदीनामीनः स्वामी समुद्रः भव
तोग्रेनौनः काकादीनएव· मुक्ताभिरमुक्तान्यक्तानि रत्नानियत्रसतथा· सितरुचिश्चंद्रस्तेनरुचिरा
मनोहरोरत्नाः समुद्रावृद्धिकाछायस्य· तदेतेषामुदाहरणानां चतुर्ष्वपि पादेषु यथोक्तं यमकमस्ती
तिचतुष्पादयमकप्रपंचोयं· एवंत्रिपादयमकप्रपंचोपिभवतीत्याह· त्रिपादयमकेष्विति· विशदाध
वलाविशंतआमत्ताः सारसायत्रतस्मिन्· सारसंसरः संवंधि· मन्मथोन्माथदायितयाकुत्सितं रुतं कु

र ही उ षं ३ २७

रुतं· मध्यांतादौ नित्रिपादयमकानि किमिति नोदाहृतानीत्यत आह नास्येति। उत्कं गउत्कलिकातदुत्त
रंतरं कूलं· मन्मनोऽव्यक्तमधुरः मन्मनो मदीयं मनः। अलिनियोमलिनिमाकज्जलाम त्वंसमत्त
माधवयोषितां याद्दवस्त्रीणां विलोचनतारकास्तुलयतिस्मेति संबंधः केतू हृतो ध्वजतांनीतः उच्चै
र्वानरो हनूमान् नरोऽर्जुनः आघंतमोरनुह्वेरवीति· महाकविप्रयोगेषु विशेषशोभाकरतया प्रसिद्धेर
भावो नुह्वे रवः ने त्वसंभव एव· एवंमध्ययमकंत्वित्यादौ बोद्धव्यं· आमर्शनं प्रोंछनं· दलत्कुवलयमि
ति क्रियाविशेषणं· तरंगाणामितस्ततो वळनेन प्रोद्धतरकुवलयकलिकास्फुरणं जातिः आवृ
त्तिः सकृदावर्त्तनेनैव निर्वहति· तत्किमसकृदाहृत्तो यमकं न भवतीत्यत आह एवमिति। आवृत्ति
सामान्यमधिकमनधिकं वा द्वयमप्यावृत्तिपदेनाभिमतमित्यर्थः। वियदाकाशं· वियती अपग
च्छंती वृष्टिपरंपरा यस्मात्तत्तथा परमुत्कृष्टं· रमणीयं· घनाघनाली मेघपंक्तिः रसितैस्तनितैः आ
सिताऽवलंबिता· सिताभ्रशुभ्रा· सरांसि च सरस्यश्च सरः सरस्यः स्वरसा रास्तत्कालोन्मिषितकूजित
कांतिप्रधानाः सारसाः पक्षिणो यत्र तास्तथाभूताः सभागं हृहसरूपाः जलसमुद्रा यो वा· समाः सदीप्तिः

२८

ताराणांतारतानिर्मलताप्रकर्षः किंचिद्धनरोधसद्भावादीषत्तारतायस्यांसातथा· आवृत्त्येकरूपतायाम
पीति· यज्जातीयमाद्यपादे पदमारब्धं तज्जातीयमेवद्वितीयादिपादेष्वपियथास्थानमावर्त्तत इतिप्र
कारांतरमप्यावृत्तिपदेनैवसंगृहीतमित्यर्थः। यामत्रयाधीना यामया· प्रहरत्रयपर्यवसितयावद्दी
र्घताप्रकारया· निशारात्र्या मरणं यामेति वियोगखिन्नस्यप्रार्थना· किमित्येवममंगळमाशास्यत
इत्यत आह यामिति· धियाबुद्ध्यायामयांजीवितसर्वस्वाभिमानगोचरतामनैषं· सा अनया कस्यको
रिशतायमानयामयारजन्या असूनांप्राणानामार्त्तिः पीडातयाद्वारभूतयाप्रायेणमथितैवभविष्य
तीतिसुकुमारतरकांता जीविताध्यवसायो क्रियेयं· अत्रयामेत्येवपदंपादचतुष्टयेप्यावृत्तएवमु
त्तरत्र· आयतिरुत्तरकालविशुद्धिः जितेंद्रियो विजितेंद्रियग्रामः एवंभूतो भवान्यतेर्नहीयते यतिनु
त्यएवभवतीत्यर्थः अपिशब्दो भिन्नक्रमः अमायतामायाशून्यत्वं सापितवद्द्यते परिछेत्तुमश
क्यायद्वयं विनाशमयतेऽगच्छत्सुखायाऽभूत्· नतेः कुपितकामिनीप्रसादरूपायाः रसोवि
प्रलंभपृष्ठभावीमधुरतरः संभोगः किमितितादृशारसं नजानते यस्मात्तुसन्नता अवसादयो

२८

गित्वं इनता प्रभुता एते द्वे विरुद्धे नैकत्र संभवतः नहि प्रभवो नमंति· एतदेव व्यतिरेकेण द्रढयति· य एवेति·
येदीना स्त एव न ते न शिरसा लक्षिताः तेन हेतुना दैन्यरसेनात्यंतं चरंति व्यवहरंतीति· अव्यवेत पदार्थं
व्याचष्टे· तदेतत्सर्वमिति· क्रमप्राप्तं व्यपेतमुदाहर्तव्यमित्याह· अथेति· कांचिनगरी तस्याः प्रतोली राज
रथ्या तामनुलक्षीकृत्य· केन पानीयेनांचन शीला या स्रवंती नदी तद्धन माता रथ्या· कांचि प्रभृतीनि
मेखला प्रमुखानि· कांचित्सर्वांगीणालसभावसमर्पिका अत एव मेखलाप्रभृति भूषणत्यागः अत्र
प्रतिपादं कांची कांचीत्यादि नैरंतर्येणावर्तनेन व्यवेतं· सांतरत्वेन पुनरादिमध्ययमकमेव स्यादितिपा
दभेदेनैवास्य संभवः। मदन एव दारुकाष्ठं तत उल्लसितः शिखा मंजरी छटा ज्वाला च· स्वभावतास्त्रमेवम
धुमदेन यद्वि गुणमरुणं द्रूणमुखं तत्छविः दारुणो भयंकरः ममत्वदा समं दिशो ऽरुणात् रुद्धवान्·
आश्रवणमेव तापकारितया नलो वह्निः अत्र यद्यपि प्रतिपादमपि व्यवायेन मध्ययमकं संभवति त
थापि न तथोल्लेखीति पूर्वापरसदृशमेवोदाहृतं सच्चरिता प्रमत्ते ति सा त्वासंसंबोधनद्वयं· या तव
प्रियारतोत्सवामोद विशेषेण रतिकेलिहर्षप्रकर्षेण मत्ता तयेदं मंशुमन्मणि किरणाकरंबितं भू

षणं धार्यं· अर्हेद्धृत्यः त्वया किमिति न धार्यमित्यत आह। न मे भूषणसंपाद्यया कांत्या किं च न फलं· कामिनां
मंडनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेनेति न्यायात्· अत्रापि सांतरनिरंतरप्रसंगे पादभेद एवं सं
करः संकीर्णव्येवेतानि तु प्रतिपादमेव संभवंतीत्युदाहरति· आदिमध्येति· घना गिरींद्रो मात्यवंत मार
भ्यसुवेलं यावद्गिरिपरंपरा वनं जंपदं जनानां मतासंमता· तरुमृगः शाखामृगो हनूमान्· अत्र घनेत्या
दिशद्भागः पादचतुष्टयेपि गिरींद्रेत्या घनावृत्तव्यवहित एवादिमध्ययोरावर्त्तत इति गाः कूजितानि·क
दंबसौरभानीत्न वर्षर्त्तुपयोदाः कलयंति कलरूपा तां नयंति· कूजितक्रियांतराळकाकोद्रुतमध्यविलंबि
तात्मा नेकोलयः अभ्रं मेघः नीपः कदंवः कदंबवनधूननेन सर्वतः सौरभसंचारोपपत्तिः अत्र विह
गा इत्यादिकं प्रतिपादमाद्यंतयोरनावृत्तवर्णषट्कव्यवहितमेवावर्त्तते· मितमत्याद्दारं अरमत्यर्थं उदा
रमत्या दारव्यंजकं मुदा हर्षेण· रघुवृषभो रामः तस्य सकाशो वासभूमिः तया पुरस्कृतः आमिषादा राक्षसाः
अत्र दारमित्यादि प्रतिपादं मध्यांतयोरेवानावृत्तवर्णपंचकव्यपेतमावर्त्तते· सममसहसमंसश्रीकं संम
दोहर्षः। ययुरश्वमेधीयोश्वः। अत्र प्रतिपादं सममित्यादिकयादिमध्यांतेषु यथोक्तानावृत्तवर्णव्यवहितमा

वर्त्तते· द्विषतां शत्रूणामंतकरेण विनाशकारिणा करेण हस्तेन· करेण वो हस्तिनः एवं द्वितीयादिपादगो
चरं मध्यादियमकं चक्रिमिति नो दाहृियत इत्यत आह अस्यापीति· रमणं वल्लुलं मुदाहर्षेणान्वीतं सं
गतं कर्तुं ध्वनिमाइ त्यन्वयः उदारमुत्कृष्टं· मदेन भ्रमंतीश्यामांता अदभ्रं विपुलं· अत्र यद्यपि चतुर्षु पादे
षु यमकमस्ति· तथापि द्वयोर्द्वयोरेवावृत्तिः पर्यवस्यतीत्युदाहरणद्वयमिदं द्रष्टव्यं एवं प्रथमतृतीययोः प्र
थमचतुर्थयोर्द्वितीयतृतीययोर्द्वितीयचतुर्थयोश्चाव्यपेतमादियमकमवसेयं· अनुद्दिष्टो व्याख्यात
एव· कलभाः करिशावकाः रवः शब्दः कलो मधुराव्यक्तः भैरवो भयंकरः अनुवनमिति वीप्सायामव्ययीभा
वः चमरी चमरगवी· चयः समूहः मरीचयः किरणाः अत्रापि पूर्ववदेव द्विपादयमकं व्याख्येयमिति·
एकपादयमकमिति· नैरंतर्येणावृत्ताव्यपेतत्वं सांतरत्वे त्वादिमध्यादिभावप्रसंग इति शुद्धं न भवति
तत्किमनुदाहरणीयमेवेतदित्यत आह। अस्येति· आवृत्तिरेकत्रैव संभवतीति एकपादगोचरता· सा तु प्र
तियोगितया द्वितीयमपेक्षत इति पादांतरस्वीकार इति कथंचित्प्रकृतिगणना समाधानमेतत्· मधुश्चै
त्रः अनेन पूर्वावयवेन वसंतो लक्ष्यते एणदृशां हरिणलोचनानां मधुरेण मधुरास्वादेन· सहकारोद्गमेन

३०

वेत्ये वकारेणासत्तामितीवतावद्भिरव्यातप्रभावातिशया: पिकपंचमादय: सहकारप्रथमोद्भेदमात्रेणैव
तुमानिनीमानग्रहवार्त्तानिरवशेषिते त्युद्दीपनतापकर्षो ध्वन्यते· गंभीरो मांसलः गळः कंठः मंगळं क
त्याणं· निःसंगमप्रत्यूहं· उदयः संपत्तं प्रति· अवसितं समाप्तं समुदाप्रतिततमतुबद्धं· हसितं द्रु सितं भ्र
रेणाभासितं शोभितं· संमदो हर्षः अत्र प्रतिपदं सितं सितमित्यादि द्वाभ्यामेव यमकं निर्व्यूढं· तृतीयं तु सितमि
त्यादिकमाधिक्यमेव प्रयोजयति· तच्च सर्वे मनावृत्तिव्यवहितमिति व्यपेतयमकमेव भवति· सारयंत
मात्मसमीपमानयेतं· उरसा घनतरस्तनाढ्येन· सारलूतं जीवितसर्वस्वतामापन्नं· उरुर्महान्· सा
र उत्कर्षः। अनुहृतसारसासारसकूजितसंवादिनी· सारसासशद्वाकांचिर्मेखलायस्याः सातथा· सा
रसानुकृतेति जातिकाळसुखादिभ्यः परवचनमितिनिष्ठायाः परनिपातः। रसायनं सर्वोपद्रवहरं खे
षजं· शुचिनाकांतेन· मृदुनाकोमलेन· उदितं भाषितं· लघुना तरळेन· गुरुणा स्तनजघनभारालसे
न· व्याजृंभितेन प्रकटीभूतविस्तारप्रकर्षेण· अत्र तेनतेनेति मध्यांतयोरावृत्तं· [illegible] त्यावृत्त्यैकरू

३०

पतायामेकस्यादावितरस्यांते वर्तमानमेकरूपं संधिपातित्वादस्र्छंनयमकमेव भवति· एवमादिम

ध्वांतयमकमपिनात्रसंगच्छतेतर्हिसंधिविनाकृतमुदाह्रियतामित्यत आह आदिमध्वांतेति आवृत्याधिक्य
इति· एकैकस्मिन्पादेतृतीयाद्यावृत्यापूर्वमाधिक्यंपादांतरावृत्तिसरूपतयासारूप्यंचोक्तं· इहनुसरूपावृत्ते
वाधिक्यंनिरूप्यतइतिसंकरप्रकारोपलक्षणमिदं· सभासुजनसमवायेषु असुराहतेमंदिरयानपरान्नूतेः
महीसुराणांब्राह्मणानांवसुनातेजसाराजितेः शोभितेः भासुराः दीप्ताः सुरान्देवान्ननयंतिनिषेधद्वयेनयां
त्येवेत्यर्थः रागोनुरागस्तत्प्रधानआत्मायासांतासुप्रजासुराशितांपुंजतांगताः। व्या वेतमुपसंहरति।
तदेतदिति· क्रमप्राप्तमस्थानयमकंलक्षयति। नादाविति· आदावेवेत्यादिनियमेनस्थानयमकमुक्तंतद
भावेत्वस्थानयमकंभवति· तत्किमाद्यादिस्थानमिदंनाश्रयतएवनेत्याहसंधौवेति· संधौपादसंदंशे· एक
स्यादिरपरस्यांतइति· नेदंस्थानयमकंतद्विप्रतिपादंस्थाननियमेननिरूप्यतइत्युक्तप्रायं· अव्यवेतव्य
वेतमितिद्वाभ्यामथव्याचीयते· तत्प्रथमंपादश्लोकतयाद्विविधमित्याह। पादेश्लोकेचेति· पादसंधौचय
द्बध्यतेतत्त्वभेदेचान्यभेदेचस्थूलंसूक्ष्मंचभवतीत्यर्थः एतद्यथास्थानंविवरिष्यते· स्थूलंसूक्ष्मंचेतिपू
र्वेणापिसंबध्यतेवहुवर्णावृत्तिस्थूलंअबहुवर्णावृत्तिसूक्ष्मं· चीनांपक्षिणांवृंदंक्वरेश्रृंगेसमरु

३१

३)

ति॰ मारुतसहिते॰ सुतरुणि शोभनवृन्दे कूट विशेषणद्वयमिदं॰ समरुति॰ समानकूजितं॰ सुतरुणीति प्रि
यासंबोधनं॰ वाशब्द इवार्थे॰ सुरमणीनां देवमणीनां गुणे नदाम्नारोचते शोभत इति क्वि पू॰ तस्मिन् क्रो
डे॰ सुरमणीति संबोधनं॰ गुणेषु रुचिर्यस्य तद्गुणरुचि चित्तं॰ अत्र समरुति सुतरुणि सुरमणि गुण
रुचीति द्वितीयचतुर्थपादयोर्वर्णत्रयावृत्तिद्वयमिति पादव्यापकमव्यवेतमुच्यते॰ रुरु बद्ध शृंगो
मृगः॰ उरुरतिः॰ उपचित प्रीतिः। अतितनुसति हशा तनुर्यस्या इति संबोधनं द्रुत्वः मतिमति॰ मतिरु चित्त
ज्ञानं तद्वती त्यपि संबोधनं॰ पश्येति वाक्यार्थकर्मकं॰ गुरु विपुलं॰ गुरुः शुक्रः मयो दैत्य विशेषः तद्युक्तं॰
तरित रिविजयमाने मयि सति॰ सतीति संबोधनं॰ सती॰ शोभना॰ यथा मयदैत्यानीक विजये लोको
यं सुखमास्ते तथा सो रुरुरिति वाक्यार्थोभिमतः। तदिदं वर्णद्वयावृत्या समस्तं न चान्येन व्यवहितम
व्यवहितमित्यव्यवेतं च भवति॰ तदेतदेकस्मिन्नपि पादेऽनुक्तद्व्यादि पाद विकल्पेनावबोद्धव्यं॰ नगजाः
पर्वतजाः॰ दयितावल्लभा॰ एवंविधा अपि हस्तिनो न दयिता न रक्षिताः वीनां हंसप्रभृतीनां क्षिणां गतं चं १ ३१
क्रमणं विगतमपगतं ललितं भ्रष्टं प्रमदाकांता अप्रमदा कांता अप्रमदा हर्षशून्या॰ आमश्चित्तव्यथा नृपो रो
विलसितं ललितं १

गस्तेन हता॰ महतां प्रकर्षेण छिन्नां अरण्यं संग्राममवर्जितं मरणं विनाशः समया दैवात् समयात्संगतमा

सीत्॰ [illegible]विधानि धववनानि यस्यां सा तथा॰ धवो विटू खदिरः नागान्सर्पान् हस्तिनो वा गरध्यं त्वभि

लषंतीति नागगर्द्धाः ऋद्धा उपचितानानावयोविचित्राः पक्षिणस्तैर्वितितं व्याप्तं गगनं यस्यां सा तथा॰

कल्लोलपरंपराभिरनामं नमनं शून्यं॰ मज्जंतः स्नांतो जना यस्यां सा॰ अनास्त्री रूपा॰ रुरूणां शशानां च

ललनमुत्फालो यस्यां सा तथा भूतानो आवयोअबंधुं शत्रुं धुनानाक्षिपंती॰ हरिप्रवो धेवलोपद्रस्य हस्त

प्रत्युक्तिः यस्मान्ममहितं तन्नाहितं तनोति॰ अनाननो मुखशून्यः यः स्वआत्मा तेन स्वनाना शब्दायमाना॰

स्त्रीलिंचानश्रू अनित्यमागमशासनमिति मुगभावः यदिवा अनाननो मुखविनाकृतः स्वकीयः स्वनोप

स्याः सा अनितीत्यनाप्राणयुक्ता॰ अंतर्लीतिवार्थं चैतत्॰ वर्णद्वयपर्यंतमावृत्तिः सूक्ष्मता॰ सेवैकवर्णगो

चरा सूक्ष्मतरा॰ पादसंधाविति॰ स्वभेदे चान्यभेदे चेत्यत्र व्यवैतयोः स्वत्वमन्यत्वं च व्याख्येयं प्रकरणा ता व्यवेरु

त्॰ सत्त्वे प्रसंगे च यथासंभवं सप्तमीयोजनीया॰ मदेन प्राप्तरागाऽपितन एवमन्मथोन्माथेन तापितां उ

त्तापं गतापि यदात्मानमबलानयोजितवतीतन्नूनं मादेन सामदीय॰ ~~मदेन प्राप्त समा~~ दुरितेन भूयोपि

३२

मानरसंप्रापितास्यात्‌· अतएवेयतेवक्तुमशक्यायसंतापायनासेतिकाक्वा तापप्रकर्षेभणनं· योजितेति
योजयतेर्गत्यर्थत्वमोश्रित्य कर्त्तरिक्तः· गत्यर्थाकर्मके त्यादौ चकारस्यानुक्तसमुच्चयार्थत्वाद्वा· अत्रप्र
थमद्वितीययोस्तृतीयचतुर्थयोश्चांतरतोविच्छिद्यपाठेक्रियमाणेसंधिषुव्यवेतप्रसंगः स्यात्‌· निरंतर
पठितौतुसनिवर्त्तते· तथैवचरत्नौचितीवृत्ता सो भाग्यमुन्मिषति· तेनव्यवेतबाधाख्व्यवेतपुरस्का
रःतदिदमाहअत्रेत्यादि· संदंशः संधानं· मतासंमता आरमतायोगिनां अकामतावीतरागताधुनाना
ऽधः कुर्वाणा अतापोनायासस्तेनलब्धेअग्रिमतानुलोमतश्रेष्ठतानुकूलत्वेययासा· अतएवोन्नमता
याविलोमता अतिरेकमयतीनगच्छंती ईदृशीतवाताम्यतः संसारखेदेनाबध्यमानस्यमतोसमतान
तुवामतावैषम्यमिति· अत्रप्रतिपादमादिमध्यांतेषुव्यवेतयमकमुपलभ्यते· संधिषुचसंदंशपाठा
दस्थानयमकमव्यवेतंच· नचपूर्वापिलब्धं बाध्यते· नवासंधौविरतिरितिप्रसंगः संगच्छते· तेन
व्यवेतानुच्छेदकमेतदव्यवेतं· अत्रापिरत्नौचितीसर्वस्वायते· तमालगहनतयासतमाः सांधकारः
पारानामनदीतस्याः पारेआयतोविस्तीर्णः दावोवनंतद्वद्धकुलत्वाददावोवनवह्निप्रभावरहितः लो

३२

कालोकश्चक्रवालाख्यः पर्वतः तद्वदुन्नतिस्तत्सदृशो यः सोयं सत्यनामा गिरिः अभ्रङ्कषैः अन्यैः कूटैः शृंगै
र्लङ्घितः हिरण्ययोवा क्यालंकारे· अत्र प्रथमतृतीययोः पादयोर्द्वितीयचतुर्थयोराद्यंतयोर्व्यवेतयमक
मेवववर्त्तते· तदस्तु छेदेनैव संदंशपाठाद्दादियमकयोराद्यंतयमकयोश्चाव्यवेतादिमध्यांतयमकताप्रका
शते· यतो द्वितीयचतुर्थपादयोरादिमध्यांतं यमकमेवमध्यमयमकभूमिकामवगाहते अत्रापि रत्नो
चितीगवेषणीया· तदेतद्विवरणे व्यक्तमेवेति नाकवनिताः स्वर्गस्त्रियः ताभिः सहितं यतो नितंबे स्वच्छं
दविहरणोचितेरु चिरं मनोज्ञं· सुनिनदैः शोभनशब्दैः महाफणावान्वासुकिः अवतीर्णस्ततः रसपरा रस
नीयेषु श्रेष्ठा· परास्तवसुधा त्यक्तभूभागा· सुधापीयूषं· अत्र प्रतिपादं नितंनितमित्यादिकमव्यवेतं·
संधिषु च विरत्ति पाठे चिरं चिरमित्यादिव्यवेतं प्रतीयते· तत्र संदंशे क्रियमाणे व्यवेतं निवर्त्तते· अ
व्यवेतं तु मध्ययमकमवतिष्ठत एव· तेन सर्वमिदमव्यवेतमेव जायते· अत्रापि रत्नोचिती पूर्ववदेवश
रणामित्युपसंहारे दर्शयति· उभयमपि चैतदिति· स्थूलसूक्ष्मभावेन संधियमकमुभयं· यस्य गिरेस्त
टेरविमादित्यमुदग्रतापं दधाने पिभंगावलिभिर्भ्रमरमालानाखिघत· यतो ऽरविंदधाने पद्मानां निधान

३३

33

भूतेनिपीतरसाआस्वादितमकरंदा·अतएवमत्ता·नमंतितामरसनियस्याःसकाशात्तात्तया·भरनमि
तपद्मकुहरप्रवेशान्मधुरससेवयाचभ्रमरमालयाखेदोनाधिगतः अत्रद्वितीयचतुर्थपादयोरविं
दधोनेरविंदधानेइतिरसानमन्तारसानमत्तेतिद्वाभ्यामेवावृत्तिभ्यांव्याप्तत्वादाद्यादिविभागासंभवेअ
स्थानयमकमेवेदंव्यवेतंतुकथंभवतीत्यतआहमाभूदिति·करेणुर्हस्तीप्रास्थित·चलितः तेनघं
टारेणुरशब्दायितःसहस्रशइतिक्रियाविशेषणं·करेस्थूलहस्तेऽणुःसीत्कारविकीर्णतयापरमाणु
साद्भूतःतेनशीकरेण·ननुविषमपादयोराद्यन्तरविनाकरणेनमध्येसमपादयोःपुनरादावेवरेणु
रित्यावृत्तिरस्तितत्कथमस्थानयमकमिदमित्यतआहनत्विति अंतोवृत्तेरसंभावितत्वादादौम

रेणु

ध्येवासावाच्या·नचेयमपिसंभवति·रेणुरितिशब्दमागमपेत्यप्रवृत्तायामावृत्तौतद्विरहात्·हेजयं
तियेतवदेहंदुर्गातारादिरूपेणप्रपंचमानांमूर्त्तिंसदानमस्यंतितेजयंतिसर्वोत्कर्षेणवर्त्तंते·यत
स्तएवमवान्संसारसरणिमस्यंतिक्षिपंति·भवात्परमेश्वरादन्यतावेदस्तेनोनंसतःश्रेयसआदा
ग्रहणंयत्रतादृशीईहाचेष्टायत्रेतिद्वयमसनन्क्रियाविशेषणं·अत्रजयंतितइतिप्रथमद्वितीययो

३३

राघंतौ· सदादेह मितिप्रथमचतुर्थयोरं तादीनमस्यंतीति द्वितीयतृतीययोर्भवान्यतइतिचतृतीयचतु
र्थयोराघंतौच स्थूलावऱ्हत्वाव्याप्ता विति अनावृत्तभागाभावात् श्लोकेस्थूलव्यवेतमस्थानयमकमिदं·
मानिभिरितासंगता· याह्नायामेनप्रहरमात्रेणानीताप्रापिताशत्रून् जित्वेत्यर्थः आनीतः प्रापितआ
यामोवृद्धिर्यस्याः सा तथा· पाव्ळनेनलोकानामाधिमीरयतिक्षिपतीतिलोकाधीरा· धरिरप्राप्तसमर
संभ्रमैरालोक्यतइति धीरालोका· सहइनेनसेनान्यावर्त्ततइति सेना असन्ना अवसादरहिताएवंभू
तायासेनासा आसन्नानिकटवर्त्तिनी सती आरं अरिसमूहं हत्वा त्वा त्वां सारंकार्यसिद्धिं ब्रवीति· ननु
यामामायामालोकालोके त्यादिकमाघंतयोनीतानीतेत्यादिकं तु पदचतुष्टयस्यापिमध्यइति व्य
वेतमाघंतव्यवेतयमकं तु मध्ययमक मितिस्थानयमकमेवेदं संकरोपिनष्टयग्यमकता प्रयो
जयतीत्यत आह· अत्रयघपीति· यामेत्यादिकमादावनुसंधायव एवचितुष्कव्यवधिनापादांतेनुसंधीय
मानं मंडूकप्लुतिर्हि प्रयोजयतीति न तथा सोल्लेखं· यामानीतेत्यादिस्थूलचतुष्कप्रत्यागतेननीताया
मेत्यादिना त्यंतमुद्भटेनयमकछायातिरोधीयतइतिचनसोल्लेखं· मध्यादिकमव्यवेतं सोल्लेखमित्य

पिनवाच्यं· यामानीतेत्यादिवं धन्छायार्पकयतिकरणेनानुल्लेखत्वात्· श्लोकस्तु द्वाभ्यां द्वाभ्यामावृत्तिभ्यां व्याप्त
इति समुदायस्योल्लेखनेव· तदिदमुक्तं मंडूकप्लुत्या प्रत्यागतैर्यतेश्चेति मध्ये यतिकृतो व्यवायो बोद्धव्यः· अ
त्रापि वृत्तौचित्यमनुसरणीयं· हठपानेनेनतांबूलरागो निःशेषितस्तेन प्राप्तपरभागः सहजरागोन्मेषः व्य
वधायकशब्दाभावे कथमिदं व्यवेतमित्यत आह अत्र प्राग्वदिति· नन्वपोढरागेत्यादौ पूर्वेदलेऽपि यति
विच्छेदादस्ति व्यवधानं तत्कोऽस्य विशेष इत्याशंक्याह न चेति· धराधरः शेषः महीं पातु स इहं तदित्यन्वयः।
सालः प्राकारः सुराणां शंपनं संतापजननं तस्मै हितं अलमत्यर्थं सालंका· तपनीयं सुवर्णं तपनीयं च
तद्भास्वरं चेति कर्मधारयः रत्नसंभरः समूहस्तस्य क्षोभः प्रकर्ष[illegible]जः कोलाहलः त्रिकूटः सुवेलः अक
लंका दोषरहिता अकलिकानि कलिरहितानि अद्रिकूटानि सुवेलशिखराणि यस्यां सा तथा· यत्तूत्समा
गमिति· भागशो विविच्यमानं नास्त्यानेति। मंदयात्तत्कालोचितप्रतिपत्तिविधुरया· आवर्जितो मानईर्ष्यारि
षलक्षणो यया सा तथा· सौलभवती अनयोः कर्मधारयः नमन्यादौ तेलुगन्नापि दयावर्जितो मानसात्मा
नो यस्याइति बहुव्रीहि डोपू· आनाकं स्वर्गावधि ललनमुल्लासस्तच्छीलः रुचिरेण मनोहरेण नेत्रानापके
× स्त्रत्नमेव आवृत्तिभूयस्तया तु स्थूलमिव प्रथत इति सत्त्वमेति कयाभिधानं· क्रमप्राप्तमिदानीं पादयमकमुदाहृ

ननानाकलानांचातुःषष्टिकीनां आलीपरंपरा· एणनेत्राहरिणलोचना· द्वयमपि श्रीविशेषणं· समंस
मकालं क्षणेन ततो विस्तीर्णः तामनुभवैकसाक्षिकां चिंतानुस्मृतिलक्षणां निर्वृतिं अरसेद्दितिसोपा
लंभसंबोधनं समंततः सर्वतः तामरसेक्षणे कमलनेत्रे नकिमपाकरोतीति पूर्वेण संबंधः। अव
लाबलाख्येन दानवेन रहिता विभुना शक्रेण ध्यासिता सुराणां देवानां सभा मृणाळनिर्मलैस्तव
गुणैरारोहियतोऽतः सत्वं पुरामबळाविभूषिताः स्त्रियोलंकृताः विहारयन् भासुराणां सतां संपदो निर्वि
शेत्याशंसा· कलं मधुरमव्यक्तं भाषितं· तनोर्मध्यस्य भरेण नामिका स्तनद्वयी च त्वां विहाय कं नायकं न हं
ति· वशीकरोति· अतो जितेंद्रियेषु प्रथमगणनीये त्वयि सति कलंकमुक्तं निर्दोषं तनुमधिशरीर
मधिकृत्य मृतमनामिकां गुळी न याति परस्य त्वत्सदृशस्याभावात्· निर्दोषो हि लोके ऊर्ध्वांगुल्या
निर्दिश्यते· वल्लकीगुणस्वानो वीणाशब्दः तस्य मानं या बिभर्ति कालिम्नः श्यामता या आलया·
कज्जलप्रभृतीनू अतीत्य वर्णप्रकर्षेण या स्थिता तया गात्रमुपक्रांतया भ्रमरमालया हेतुभूतया

३८
२
३५

कानामात्रपर्वते कांतं ननमति नप्रणमतीति न सुखेन नाम्यते इति अस्वानमायाप्रागासीत्‌सा
प्युद्दीपनप्रकर्षेनिःशेषितमानानमतीत्यर्थः अनेकेषुपादेषु प्रत्यन्तपर्वतेषुभ्रमं[illegible]त्यभ्राणि
मेघाएवसालोवरणःप्राकारःमान्याःपूजार्हाः ईदृशायथाहृश्यंतेतथैवमनोहारिणःअभीखे
भयरहिताःपतत्रिकूटाःपक्षिसंघाःअनेकपाहस्तिनःतेषामदभ्रउत्कटोमदःतंभरंतिधारयं
तीतिमूलविभुजादित्वात्कप्रत्ययेअनेकपादभ्रमदभ्रा[illegible]ःसालावृक्षायत्र·मान्येभीविति
संबोधनहूयमानःश्रृंगारभावःतदर्हाहृशात्रिकूटेपर्वतेआलोकयेति·विदारीकंदभेदःअर्जुनः
ककुभःबाणोगुल्मविशेषःपूगोगुवाकःद्वन्द्वंद्वत्वात्त्याच्छिकएकवद्भावःअर्जुनःपार्थस्तस्यबा
णपूगःशरसमूहःतंविदार्यभित्वा·अयुगलोचनस्त्रिनेत्रःकिराततरूपधरःतस्यससारगतः
सारबाणःउत्कृष्टशद्भःतेनसहितःअयुगद्वितीयःअलोचनस्यदुर्ज्ञानिस्य·केपानीयेलपन
शीलाहंसाःतेषांवृंदानिचारुतयामनोज्ञभावेनोपयांतिसंगच्छंते·लापेनपरस्परसंलापमा

३८
२

त्रेणोढः प्राप्तः घनो निरंतर आगमः आगमनं येषां वृंदानिळो वात्या तेनापोढो निराकृतः घना
गमो मेघवृद्धिर्नं कलापिनो मयूराः आरुतयः समंततः केकायिपतानि अपयांतिति शेभवंति· ए
कश्लोके पादत्रयाभ्यासस्यासंभवात् श्लोकांतरे च तथा सौंदर्याभावात्पादत्रयाभ्यासो न चिंत
नीय इत्यत आह पादत्रयेति। इदानीं क्रमप्राप्तं महायमकं लक्षयन्नाह। एकाकारेति· द्विविधमे
काकारं भवति· एकमावृत्ति चतुष्केण परमावृत्त्यष्टकेन तदिदमुक्तं आद्यं पुनरनावृत्तमिति प्र
तिपादमवांतरावृत्तिभेदे नैवाष्टकनिर्वाहात्· भासः कांतिः मानश्चित्तसमुन्नतिः पूजा वा आ
सः शत्रुविध्वननं हसः स्मेरता· एतेः सहवर्त्तते इति सभासमानासहसा· यतोऽपरागं चित्तकालु
ष्यमत्ति· भासमानैः शोभमानैः सहवर्त्तते· सभासमाना· सहसा मार्गशीर्षेण हेतुना प्रावृड्विच्छेद
प्रादुर्भूतान् परागान् रजःकणान् अतति प्राप्नोति परागात्· भा कांतिः तया समानैः सरूपाः तैः
त सहवर्त्तैः इति सभासमानाः षां तं कर्मणि· स्यति पराणिति ते साः तैः सहवर्त्तन्त इति सहसा एवंभू

३८
३
34

ता असमाना अनुपमा समाजनसमवायः अपरागात् अपरस्मात्पर्वतात् सहसा शीघ्रं परागात्य
रागतेति । प्रवणं प्रह्वं स्थतीरवनं प्रनिरंतः शरेत्यादिनाणत्वं अदभ्रेण महता मदेन दर्पेण चक्र
तो ये वयःपक्षिणः तैः पराजिता मूढवयो बालाः पक्षिणो यत्र तं अलमत्यर्थं पूर्वोक्तरूपान
मूढानवीनूपक्षिणो मलते धारयतीति वा । अहितेतरं गंभु जंगव्याभावर्ह स्थानं विरसम
तत्स्पर्शंति या भूभागरहितं सदा सर्वकालं तिमिभिर्महामत्स्यैः श्रितमाश्रितं अच्युतस्य भ

प्रख्यातः

गवतो नारायणस्य धाम विश्रांतिस्थानं । प्रतीतः शिखी वडवानलः तेन चरितवनं भक्षि
तजलो त्पीडमिति प्रथमश्लोकार्थः । प्रवणा मदाः मदायत्त दर्पाः सततनिस्यंदमानमदजलाश्च

ला

कमंतो ये मैनाकप्रभृतयोऽचलाः द्विपाः करिमकराश्चतैः शोभितं ऊढाः विमलाः स्वभावनिर्मलाः महिताः
पूजिताः तरंगा येन तं । विरसं क्षारं । सती भिः शोभनाभिरातिभिः पक्षिविशेषैः मिश्रितं करं वितं नच्युतं धामते जोयस्य तं
प्रतीताः अत्यागताः शिखिनो मयूराः तैश्चरितवनं श्रांततीरकाननं समुद्रं पश्येति वाकंतिरवर्हिक्रियया संबंधइति द्वितीयश्लोकार्थः ।

समानयेति । हे समानसावेयाऽसमाऽनया अविनयवतीनां धुरिगणनीयया अनयाऽसमानया समानयाया सः प्रयत्नः मानइर्ष्या (नया अविनयवतीनां धुरिगणनीसया । समानया सम)

३८
३



२

ज्ञेनानाकलानांचातुःषष्टिकीनां आलीपरंपरा· एणानेत्रा हरिणलोचना· द्वयमपि श्रीविशेषणं· समं सम
क्रालं लक्षणेन ततो विस्तीर्णः तामनुभवेकसात्त्विकांचिंतानुस्मृत्तिलक्षणां निवृत्तिं अरसेद्वृत्ति सोपालंभसं
बोधनं समं ततः सर्वतः तामरसेक्षणे कमलनेत्रे न किमपाकरोतीति पूर्वेण संबंधः। अवलाबलाख्ये
तरहितदानवेन रहिमा [illegible] रोषस्तोसमानो यस्यास्तया· तया समानया· चित्ता
नुस्मृतिसारूप्यंभजमानया पूजासहितया असमानया अनुपमया· सत्वं· मा· मां समानय संगमयेति
मन्मथोन्माथाविष्टस्यकस्यचिद्वयस्यप्रार्थना। बंधावृत्तिसामान्याघमकानंतरं श्लेषं लक्षयति· एकरू
पेणेति· अर्थभेदेन शब्दालिंगं तद्गतिन येकथमेकेन वाक्येन द्वयोरुक्तिरित्यत आह तंत्रेणेति· श्लेषो हि
संभेदलक्षणः स चात्र लिन्नानामपि शब्दानामुच्चारणसाम्येन प्रवर्तते· अनेकसंबंधानामेकरूप्येण
वर्णनं तंत्रमित्युच्यते द्वयोरिति संख्यानविवक्षिता· त्रिप्रभृतीनामपि श्लेषसंभवात्· विभागवाक्येयवि
भक्तीनां सादाद्युपादानात्तस्य यपदं तदन्यपरं विशेषशोभाकरत्वं च विशेषोपादानप्रयोजनं· आत्म

३५

नःकीर्त्तिन्नोतिस्तौतिपरेषां शत्रूणां चनुदतित्तिपति· द्विषांभयंकरोति जनयतिसुत्ददांचभिनत्तीतिधातुरूपप्र
कृतिभेदादेवार्थभेदःक्विप्प्रत्ययस्यसाधारण्यात्· ननुवर्णपदलिंगभाषाप्रकृतिप्रत्ययविभक्तिवचना
नामितिकेश्चित्परिसंख्यातं ततश्चाष्टधाश्लेषोभविष्यतीत्यत आह लिंगश्लेषोपीति· तदिदमुदाहरणीय
मित्याह।सयथेति· दर्शयतइत्यात्मनेपदेनतटस्थमपिकं नहगद्दर्शनायप्रेरयतीतिव्यज्यते· अध
रीकृताजिताऽधरत्वमापादिताच· ननुचक्रवलयदलघुतेति अधरीकृतप्रवालश्रियेतिचप्रकृतिभा
गोनभिधते· तत्कथमयंप्रकृतिश्लेषइति· नैतत्· आविष्टलिंगद्वयविशेष्यलिंगद्वयसन्निधानादनावि
ष्टलिंगंविशेषणमवश्यमुभयलिंगग्राहिवाच्यं· पंचकप्रातिपदिकार्थपक्षेविभक्तिर्घोतिकेवतथाचलिं
गभेदइतिभिन्नेविशेषणप्रकृतीमिथःसंश्लिष्टेइति· अवेत्यादि· तद्वाक्यस्थशब्दांतरप्रकाशितःसोद्वेगः
अतथाभूतोनिरुद्वेगः मत्वर्थीयेनिप्रत्ययेहारवंतोहारिणो आवश्यकार्थणिनिप्रत्ययेसतृदयानांम
नोहरतइतिहारिणो आनंदघनरसचर्वणारूपोविस्मयः अद्भुतंच अपिशब्देनविरोधद्योतकेनहार

३५

हीनयोरपिहारसंबंधोविस्मयरसार्पकइतिमत्वर्थीयोनुद्वेगणात्सोद्वेगःप्रत्ययश्लेषस्तुकथंभवतीत्य

तआहणिनिप्रत्ययोरिति॰ व्रणरूढिस्थानं श्यामं भवतीति लांछनछायाभूता कीदृशी हारणी हरितावर्ण
दित्तुदात्तात्तोपधात्तोनइति ङीपि नादेशे च रूपं॰ सेयं प्रतीयमानगुणानो श्वेता॰ अहरिणरूपापि व्यवहा
रारूढहरिणतामापन्नेति च्विप्रत्यये च हरिणीभूतेति रूपं अत्र ङीपश्चेवनि किंचिद्भेदकं निबद्धमि
तिनिरुद्धेदः प्रत्ययश्लेषोयं॰ हरितहरिणरूपे प्रकृती अपि संभिन्ने एव॰ संकरस्पाहृक्षण त्वात्॰ ए
वं पूर्वोदाहरणेपि॰ निजगलइतिगिरतेः कर्मणि लिरिरूपं॰ येन विषं कालहूरारव्यानिगीर्णानि जे
च गवेकं वेमुजगराजोध्वतः देहइति दहते स्तत्रैवरूपं॰ अंगजः कामो येन दग्धः निजे च देहे श
रीरे जायापार्वती धृता स जयतीति॰ विवरणग्रंथः सुबोध एव॰ धातुजे गन्निमो तुरपि पूर्ववद्व्त्यने
नानादित्वमुक्तं॰ परः प्रत्ययः कारणत्रयरूपं न किंचिदनारव्यातं॰ श्रुतिस्मृतीतिहासपुराणेषु प्र
सिद्धावदानत्वात्स्वरहितीयस्याभावान्न केनचिदुपमानं॰ अर्थातरे तु धातुः क्रियावचनशद्धरू
पः पूर्व एव प्रकृतित्वात्ततः परः प्रत्ययः तिङादिः अतसर्वमारव्यातमेव पदं निष्पद्यते तेन च क
थमुपमानहिति ङ॰ तेनोपमानमस्तिभिन्नार्थत्वाच्चेति शद्धभेददृढीकरणार्थमुक्तं॰ एवं तिङाम

पिसंभेदउदाहरणीयोयथा·माघंतुनामकवयस्तथापिविदितश्चैवैदेविद्यापतिर्वाचामहंवाचोरिवांतरं·अ
त्रवेदेतिप्रथमोत्तमयोःपुरुषयोरेकवचनेश्लिष्यते·अत्रनेमिरिति·एकवचनबहुवचनाभ्यांविशेषणे
षुसंबंधयोग्यताक्षेपात्तिङ्वचनेसुबचनेषुचयथायथमर्थद्वयोन्मीलनाद्बहुरूपद्वयोद्भेदः·एकवचनेनैयः
कैकएणंबहुवचनेनचमध्यैरेवाइतिसुबंतपदे·एतदेवोचित्यैतिङंतपदेचाभवन्तितिवचनद्वयलाभः·नचा
नयोःकिंचिदुद्भेदकंनिबद्धमितिनिरुद्भेदोयंतदेतदाह·अत्रेत्यादि·अरीणांमेदःशरीरधातुमेदः·पलंमांसं·अ
श्मातियःसतथाचकारउत्तरवाक्यापेक्षया·अश्मिमेदोविट्खदिरः·पलाशःकिंशुकःसालास्तरुविशेषाःतेषां
काननंअलकाश्चएकुंतलाःतत्सहितमाननंच·पूर्वोत्तरार्द्धयोर्नैकवाक्यत्वमुदाहरणत्वात्·ननुविभक्त्य
तान्नान्यत्पदंतत्रपूर्वभागेनप्रकृतिश्लेषःउत्तरभागेनचप्रत्ययश्लेषःउद्दिष्टएवतत्कोन्यःपदश्लेषइ
त्यतआह·अत्रेति·प्रकृतिप्रत्ययभावविवक्षाविरहेनासमालोकानिप्रातिपदिकान्यवावशिष्यंतइत्यर्थः·अ
लंकारःशंकाकरनरकपालंपरिजनोविशीर्णांगोभृंगीवसुचवृषएकोबहुवयाः।अवस्थेयंस्थाणोरपिभ
वतिसर्वामरगुरोर्विधौवक्रेमूर्ध्निस्थितवतिवयंकेपुनरमी·इतिवर्णश्लेषः·काश्मीरकैःपृथग्गुदाहृतः·अत

आह वर्णश्लेषोपीति· अवयवाभेदे समुदायभेदासंभवादवयवभेदे च समुदायभेदध्रौव्यात्पदश्लेषव्यव
स्थितौ तत्रैवास्यांतर्भावो युक्त इति भावः अलमत्यर्थं पातारच्छिता· आशानां निबंधनं मनोरथसफलीकर
णबीजं आशानां दिशां संश्लेषस्थानं च· अमरमरुद्भूमिः स्वर्लोकः अमराणामिंद्रादीनां भूमिरमरावत्यादिः
मरुतां च विवहादीनां भूमिर्वैमानिकपथः चामरमरुद्भूमिः चामरमव मरुतामाश्रयश्चकेथमत्र वर्णश्ले

श्रा६

षइत्यत अत्रेत्यादि· पतिचंडिम्पामालजूइति पतेरालच्प्रत्यये पातालमिति रूपसिद्धावाकार एवमध्यव
र्त्तिवर्णः तत्रैव पुनरेकदेशप्रतिसंधाने पाताळमित्याकारश्चप्रतीयते अत्रैवैकः पूर्वपरयोरिति वचनादा
कार एव श्रूयते तेनोत्तरः पौरस्त्येन संभिन्नः एवं चकारस्योत्तरसंभेदो व्याख्येयः द्विव्यासंस्कृत्रिमा· प्राकृता
महाराष्ट्री· भावश्चेतसोलयः लालसइछा· तस्माद्भवतीति लालसभूः संकल्पयोनित्वात्कामः तं लेढीति कर्म
ण्यण्· ऊहस्तर्कः संशयरूछभावी विपरीतप्रत्ययविशेषः कथं तं हरतीत्यत आह महेश्वरसन्निधाविति·
सन्निधिः साक्षात्काररूपः सर्वज्ञानानि संस्कारप्रवर्त्तकानि· तुहिर् अर्द्दने तोहतीति इगुपधत्वात्कप्रत्यये
तुहाः अरयो द्विधा आंतरा बाह्याश्च· आंतरा मदमानादयः षट्· बाह्याः शत्रवापहारकादयः तत्र पूर्वावच्छेदे

३७

37

२॥

चहरिणारिसारदेहत्वं हेतुरुक्तः हरिणारिसार इव सारो स्येत्युत्तरपदलोपे हरिणारिसारः देहो यस्येति विग्रहवा
क्यमवसेयं· यथाश्रुत्यर्थकथनमात्रं उमायाएवेत्यत्र लालसमूले हद्रित्यच् प्रत्यये व्याख्येयं· तुशब्दस्त्वर्थे·
तुतुवतु म्हतुह्वतु ~~[illegible]~~ड· सइति सूत्रेणात्· हरिनारी लक्ष्मीः तस्याः सकाशात्सारः प्रकर्षशाली देहः पंचमीति
योगविभागात्समासः कुरुलाश्चूर्णकुंतलाः महीपदेहे नभूगोळवर्त्तिनः प्राणिनोभिमताः तेषां मोहग्रहइ
ति व्याख्येयं· विछिन्नो विभक्तावयवः एवं पैशाचादिभिरपि संस्कृतस्य प्राकृतादेश्च परस्परसंभेदनात्श्ले
षोगवेषणीय· इत्याशयवानाहाययावेति· अकलंकं दोषरहितं मानयेति धात्वर्थस्य भावत्वेनान्वयात्सू
जांकुर्वित्यर्थः ब्रह्मणाममिलक्षीकृत्येति· रुचयः आत्मीयाः अरा विघंते यस्य तद्रिचक्रं हेतयः किर
णाः जननं जन्म· सामानिकायति कीर्त्तयतीति अपवादविषये क्वचिदुत्सर्गः प्रवर्त्तत इति कर्मण्यण्· क
लाअवयवाः तच्छब्दः प्रसिद्धो· वीनां पक्षिणां राजा गरुडः तमभिइतं गतं कमला लक्ष्मीः तस्याः आसन
मधिष्ठानं मामां नयेति· अनुद्दरावर्त्तेश्वित्रा दुद्धटावर्त्तिमनुप्रासं पूर्वं लक्षयति। आवर्त्तिरिति· वर्णानामि
ति· वचनमतंत्रं· सारः सारस्वती मूर्त्तिरित्यादावेकवर्णावृत्तेरप्यनुप्रासत्वात्· तेनयमकव्यतिरिक्ताव

३७

णावृत्तिरनुप्रासइतिलक्षणमुक्तंभवति। नचश्लेषेतिप्रसंगः तंत्रातंत्राभ्यांविशेषात्। पूर्वंजातिप्रति
बिंबनेनबंधच्छायार्पकतयानुप्रासोलंकारपदवीमध्यास्ते। नचनिर्निमित्तमेवप्रतिबिंबनमतआहन
तिदूरेति। अस्तिकश्चिदुच्चारणस्यज्ञानस्यवाविशेषोयः शीघ्रमेवसंस्कारमुद्बोधयतीतितद्व्यतीवणावृत्ति
रभिप्रेताअतएवप्राचीनवर्णजात्यनुगतः सत्तदयावर्जकतयाप्रकृष्टश्चवर्णानामनुप्रासइतिकाश्मी
रिकानिरुक्तिः एवंस्थितेसामान्यलक्षणंविभागमाह। श्रुतिर्निरिति। आवृत्तिर्हिधार्णमात्रावलंबिनीस
मुदायगोचराच। आद्यापिद्वयी। सामान्यतोरूपतश्च। सामान्यमपिद्विधा। स्थानतोव्यापारतश्च। तत्रस्थानं
कंठादिलक्षणंसेवश्रुतिः श्रूयतेहितयाभिव्यक्तोवर्णः व्यापारोभिव्यंजनरूपः सएवरसविषयेवर्तनं
वृत्तिरुच्यते। श्रुतिभिरित्यादौविच्छिन्नतलक्षणेहतीया। प्रायेणेतिश्रुत्यनुप्रासोहिश्लेषघटकः श्लेष
श्चगुणांतरसमकक्षतयाऽवतिष्ठमानोवैदर्भप्रियोजयति। अनुप्रासांतरंतुप्रौढिंवामाधुर्यंवाप्रक
र्षयतीतिनतथानुकूल्यंकविशक्तिवशात्तुक्वचित्तदपिप्रयोजयतीतिप्रायपदेनसूचितं। स्थितिप्रयो
जकोलोकेनाथइत्युच्यतेतेषुनापकइत्येववक्तव्येपुनरनुप्रासपदमनुप्रासांतरसाधारण्येनेवशब्द

व

३८

लंकारत्वं दर्शयितुमभिसमाधेयं· विचित्रिता आलेख्यमिव लेखया चमत्कारकारित्वमानीता· कथं पु
नरस्यानुप्रासस्य पृथक्प्रयत्नानुसंधेयस्यापि रसप्रकाशसामग्र्यामंतर्भाव इत्यत आह। निवेशय
तीति· अक्लिष्टपदवाक्यार्थस्फुरणं प्रतिभासनं तदेव कथमित्यत आह। ससमाधिनीति· पुणैयेरिति·
तेन रसवत्त्वव्यवस्थितस्य कवेरहंपूर्विकाकृष्टेऽनुप्रासो न पृथक्प्रयत्ननिर्वर्त्य इति तात्पर्यं· ग्राम्यादि
भेदोऽग्रे विवरिष्यते· एकपदप्रतिभासमात्रानुमेयो मसृणः। रूपसाजात्येऽपि मसृणतान्यग्लतो वर्णम
सृणः। उद्भटरूपसाजात्यानुविद्धो वर्णोत्कटः। अनुद्भटसाजात्यानुरोधेन किंचिदभिभूतमसृणभा
वो वर्णानुत्कटः। एषराजेत्यादावुदाहरणे षकाररेफौ मूर्द्धन्यौ· जकारयकारौ तालव्यौ· दकारलकारौ दं
त्याविति· प्रथमपादे· तकारदकारौ दंत्यौ पकारमकारावोष्ठ्यौ तकारधकारौ दंत्याविति तृतीयपादे च निरं
तरं द्वितीयपादे रेफणकारौ मूर्द्धन्यौ चतुर्थपादे लकारसकारौ दंत्यावित्यादिना क्रमेण सांतरमावर्त्तनं न

५

रूपसाजात्यं कचिदुल्लिखतीति मसृण एवायं· अचित्रतंतुमयः पटः एकजातीयकुसुमग्रथनास्रक्।

३८

स्थिता इत्यादि। अत्र थकारतकारौ दंत्यौ· पकारणकारौ मूर्द्धन्यौ· पकारमकारावोष्ठ्यौ· ताडिते त्यत्र डकारे

लकारकल्पनया॰ सतलनधाः पंचदंत्याश्च॰ रेफो मूर्द्धन्यः इति प्रथमपादे॰ द्वितीयपादे च धकारसकारौ नका
रतकारौ दंत्यावित्यादिना क्रमेण सांतरा निरंतरा च श्रुतिरत एव वर्णावृत्तिः पूर्ववदुपलभ्यते॰ किंतु तकारादी
नां रूपतोऽपि स्थाने स्थाने पूर्वमसृणतान्यग्भूतैवावृत्तिस्तेनायं वर्णमसृणः श्रुतिसाजात्यं च न क्वचिद्वि
घटते॰ अत्रैव निदर्शनद्वयं। विमुचेति॰ हारोचितसन्निवेशयोरपि स्तनयोरनुचितवल्कलबंधसंभा
वने हेतुरहार्यनिश्चयेति॰ अत एव मा मां कोऽपि वारयेदिति कातरताप्रादुर्भावादितस्ततो विलोलदृष्टिः अ
त्र भकाररयकारावोष्ठ्यौ॰ चकारयकारौ तालव्यावित्यादिना क्रमेण मसृणा हकारादीनां रूपसाजात्ये
पि मसृणतां प्राधान्याद्वर्णमसृणा चावृत्तिरित्याह। अत्र सर्वमिति॰ वर्णोत्कटत्वं व्याचष्टे॰ वर्णाधिक्ययो
ग इति॰ उद्भटं हि रूपसाजात्यं वर्णोत्कटत्वं॰ तत्र सरूपवर्णावृत्त्याधिक्येन भवतीत्यर्थः ततः प्रभृतीति॰
तापोद्रेकाद्दत्तं दत्तमेव चंदनमाश्यानभावेन रेणुभिरलकच्छटासु विशीर्यत इति द्वितीयकामावेशो
ध्वनितः अत्र तकारनकारौ दकारनकारावित्यादिना क्रमेण श्लोकसमाप्तिं यावद्बहवो दंत्याः तेनैकश्रुति
व्याप्तस्य संदर्भस्य मसृणतायामतिशयः शिलातलेति रूपसाजात्येन लकारावुद्भूतश्रुतिको न चाधिक्य

वृत्तिरत्रास्तीत्यनुत्कटता· न च श्रुतेरुद्भवेपि मसृणतां प्रकृष्यत इति वर्णानुत्कटोयं· ग्राम्यत्वं व्या
चष्टे· तेमी चत्वारोपीति· श्रुतिसाजात्यस्य शब्दानुशासनेपि प्रसिद्धत्वं· ग्राम्यत्वे परीत्येनेति। ग्राम्यविरु
द्धस्वभावो हि लोके नागर इत्युच्यते· अतिप्रसिद्धेरभावो विरोधः तेनालंकारसमयोपजीविपंचषप्र
सिद्धिरनतिप्रसिद्धिरित्युक्तं भवति· एतदेव पूर्वाचार्यमते न विशदयति। यथोच्यत इति· एकश्रुति
कृतया भानं हि श्रुतिसाजात्यमभिमतं· श्रुतिश्च वास्तवी प्रतिभानमात्रारूढा वेति न कश्चिद्विशेषः त
तो भेदेप्येकत्वबुद्ध्यानुप्राससिद्धिः न तु एकत्वे· आपाततः साजात्यानवभासेपि सहृदयप्रणिधानेनाव
भासनं श्रुत्यनुप्रासप्रयोजकमेव· अनुप्रासस्य· अनुप्रासवतः संदर्भस्येत्यर्थः· विजातीययोरेकजात्य
प्रतिबिंबनं द्विधा भवति· स्थानसाम्ये तदसाम्ये च तयोराद्यमुदाहरति· तत्रेति दीर्घेण रंहसेति· घोरांघ्रि
रिति· रंहः संघमिति घकारहकाराणां स्थानसाम्येपि वैजात्यमस्त्येव· तथापि गृहीतो तुल्यवत् श्रुतिः प्रति
भातीति सहृदयहृदयसाक्षिकोयमर्थः· अत्रैस्यछकारयोरिति· च छौ तालव्यौ तसौ दंत्याविति स्थानभेदः
प्रकाश एव· तयापि पिंडीभूताभ्यां च स्तंबीभूतमध्यपतितौ तसौ समानश्रुतिकाविति गृहीतौ सौभाग्यमर्प

यतः तेनायं मसमानस्थानयोरेकत्वबुद्ध्या नागरानुप्रास इति तत्त्वेपीति · द्रुतादौ वृत्तिमात्रं भिधत्ते ननु रूप
मिति महाभाष्यकारोक्त दिशा येषामेकस्थानत्वेपीषत्स्पृष्टतरत्वादिकृता भेदप्रथा ते डकारादयः कति
पये स्य विषयाः ताननुद्दिश्य क्रमेणोदाहरति · क्रोड इत्यादि · अंकगतस्य बालकस्य वक्षसापीडनं संक्रांत
कमालिंगनमामनंति · अनेन किल प्रछन्नप्रियगोचरो गाढालिंगनमनोरथः प्रकटितो भवति · कर्णयो
रुपांशु यदभिधीयते तेन तुल्यमिदमिति विदग्धसहचरी परिहासोक्तिरियं · अत्र चक्रोड डिंभेत्यादौ ड
कार यकार यकाराणामीषत्स्पृष्टतरत्वादिभेदः श्रुतिसाजात्यं च सुप्रतिपदमेवेति · ढकार वकार लका
राणामिति · वकारोदाहरणं दत्तमपि वर्णांतरसरलतया पुनर्दीयते · उपगूढमालिंगनं · अपि शब्दो भि
न्नक्रमः उपगूढायापि नक्तो कसे इरेपततः कचग्रहादिकेलिषु प्रवृत्तिः लंघनेन सर्वांगीणः पुलकोद्भे
दः बहिर्व्याविर्त्तनमंतरनुवर्त्तनं च मुग्धांगना जातिः अत्रापि ढकारादीनामीषत्स्पृष्टतादिभेदः सुबोध
एव · उभयगुणयोगादिति · प्रसिद्ध्यप्रसिद्धी द्वौ गुणौ · प्रत्यक्षानुमानरूपोपायभेदाद विरोधः तद्दे तदन्य
मतेन विवृणोति · डलयोरैक्यमिति · सलीनः समीपं जलमज्जनशेषा हि वडवानलानामनर्थनिदान

४०

तयाप्रख्यातानामपिसेवयामहासाहसिकानामग्रता अत्रइकाररलकारयोर्भिन्नश्रुतिताप्रत्यक्षत एव·श्रु
तिसाम्यंपुनरनुमानात्प्रतीयते·एवमुत्तरोदाहरणेष्वपिबोद्धव्यं·कुसुमेषुसेन्येष्विति·ग्रंथिमहिम्नानका
रणाकारयोः साम्यप्रतिभासः रणांगणेंइति·मध्यवर्त्तिनांसंयोगेनसाम्यानुद्धरणं·अंगणेंशब्दोधिकर
णल्युडंतः पृषोदरादित्वात्सत्वमुत्पादनमनार्षं·एवंश्लन्यारण्यानीत्यत्रव्याख्येयं·आद्यंतव्याख्यान
मुपलक्षणमवसेयं·निरंतररेफग्रथनालीढस्यैवलकारस्यश्रुतिसाजात्यमुल्लिखतीतितदिद
माह अत्रकरीरनीळेरितिएतदनुप्राससिद्ध्याचतुर्ष्वपिपादेषुरेफानुप्रासनिर्वहणमपिकविशक्तिव्यु
त्पत्तिव्यंजकमुपपन्नंभवतीत्याह चतुर्ष्वपीति·विंघास्यंदः सारस्वतः प्रवाहः सैववाग्देवताशब्द
ब्रह्मरूपातच्छ्रितयापरब्रह्माधिगमनिःश्रेणिभूतया·शोकस्यइष्टहानिजखेदस्यविच्छेदः·अत्रस्यंदः
प्रसन्नः इतिदंत्योसकारो·ब्रह्मणाश्चेतयंतोविशोकाइत्यादेशानादेशोशकारोतालव्यो·पुनरंतेसा
सूनृतानीतित्रयोदंत्याः सर्वेषांसंभ्रमयपाठेतुल्यश्रुतितेवप्रतिभासतइति·ननुसजातीयानांनिरं
तरमावापेकन्नेव्वेकिमितिविजातीयव्यवहितैरावृत्तिरुदाह्रियतइति अतआह सर्वेचेति·श्लेष

४०

निर्वाहकतया श्रुत्यनुप्रासोऽलंकार इत्युक्तं तच्च संदर्भव्यापकतयैव निर्वहतीत्याह यथेति· ज्योत्स्नालावण्ययोः सर्वांगीणश्लेषसुभगयोरेवालंकारताप्रसिद्धिः। नन्वेवमनुप्रासांतरविषयेऽपि श्रुत्यनुप्रासः प्रसक्तः तत्र च किमनेन करिष्यत इत्यत आह अनुप्रासः कविगिरामिति· उक्तं हि न घटनामंतरेण काव्यभावः न च काव्यमपहाय वर्णानुप्रासादीनामात्मलाभ इति· स्ववर्गेष्विति· स्वशब्द आत्मीयवचनः स्ववर्गे भवाः स्ववर्ग्याः कचटतपाः तस्थोष्मोपलक्षिताः सप्त वर्गाः स्ववर्ग्येषु वर्तत इत्यर्थः कथं नु· माणिक्यस्तबकितहारलतावदन्योन्यालंबनेन परभागलाभ इत्यभिप्राय तया च काव्यव्यापकेनैव संदर्भेण निरूप्यमाणा वर्ग्यपरिवृत्तिरर्थस्यानुप्रास इति पर्यवसितोऽर्थः वर्णानुप्रासाद्भेदो वक्ष्यते· कर्णाटादिषु भवकविहेवाकगोचराः कार्णाटीप्रभृतयोऽनतुरत्तीनां देशैः कश्चिदुपकारः वनवासनामा दक्षिणापथे रत्नाभगवतीचिह्नितो देशः भ्रम धातोरिति विधमिति इति पर्यायेण· अवहित्थप्रस्तावे कर्णकंडूयितं मोट्टायितारव्यः शृंगारभावजो विकारः कुंभकुरंकुं भाग्रं तदेव अहोट्टालकः रुषहिंसायां यथोक्ते न पाणिना रुषतीति क्विप्· पेटः समूहः मधुर्वसंतः गांधर्वं गीतं अत्र धकारदकारानुप्रासेनेरासमाप्तिनिर्वहणं· परिस्रुतमदिरा·

४१

एष त्कावाणः पंचमः स्वरविशेषः तद्भूयिष्ठो ध्वनिः पंचमध्वनिः पत्रलाः सांद्रपत्राः सिध्मादेराकृतिगणत्वा
ल्लच् · पुंड्रुत्तिलकः अत्र लकारवकारानुप्रासाभ्यां संदर्भनिर्वाहः श्लोषो विरहदाहः तस्य विप्रुषस्तीक्ष्णा
भागाः ते भीसहस्रशुद्धा एव वृत्त्यनुप्रासाः संकीर्णाः पुनरन्ये पंच भवंति · तत्र संकरो द्विधा · विजातीय
संवलनं मिथः संभेदेन संयोगरूपता च · कोकिलालापेत्यादौ कवर्गांतिस्थचवर्गानुप्रासाः स्फु

३) ८४

टा एव · संयोगस्तु विद्यमानोपि न विवक्षितः विदर्भितः स्वांतरायेणावैदर्भी प्रिपंचशोभामानीतः घु
रुघुरेत्यव्यक्तानुकरणं · अत्रासमाप्तिकवर्गानुप्रासस्तवर्गांतिस्थानुप्रासाभ्यां विदर्भितः एवम
न्यत्रापि वैदर्भीगवेषणीया · संयोगो द्विविधः सजातीयेनान्येन च · आद्यस्त्रिविधः स्ववर्ग्यांतिस
रूपतदन्यसंयोगभेदात् · एते यथाक्रमं वृत्तित्रयं प्रयोजयंतीत्याह स्वांतेत्यादि · शिंजाना मधुरं
शब्दायमाना मंजीरा नूपुराः अत्र पूर्वार्द्धे स्वांत्यसंयोगिनो चवर्गेङ्त्वरार्द्धे तु कवर्गाविति · संतः क
मनीया लतानां पल्लवाः तेडुल्लासनमात्रप्रवीणतयातीव्रताव्यतिरेकः अत एव नृणां विदग्धमिथुना
नां चित्तमेव सर्वस्वभूतं हरतीति · उज्ज्वला निचुलाः तेः सज्जाः सन्नद्धाः निचुलनिकुंजसन्नद्धन

४१

दीमज्जने नशीतलत्वमुन्मीलितं· अस्तोस्ताचलः क्रमंकमनीयं· रत्यनुप्रासरसिकस्य कवेः प्रसंजमानं
दोषमपाकर्तुं शिक्षामाह। अकठोरेति· तदुक्तं· परुषाभिधायिवचनाद्यनुकरणादपरत्र नो परुषं· रच
येद्यथागतिः स्यात्तत्रापि द्रुतादयो द्रेषाः। अतिनिर्वाहे व्यक्तमेव वैरस्यं तदुक्तं सर्वएवानुप्रासाः प्रायेण
त्यादि· कोमलमात्रवर्ग्यनिर्वहणे तु शैथिल्यसंभावनमिति· ननु वर्णानुप्रासाद्वृत्तीनां को विशेष
इत्यत आह। क्वचिदिति· क्वचिद्वृत्तिभागे चरणाद्यात्मके भवत्येव क्वचित्पुनरंशभेदेन भवति न
भवति च· तावतैव तस्यालंकारत्वं वृत्तिशरीरव्यापकतया निरूप्यमाणस्तु वर्ग्यतोन्य एवायं वर्णानु
प्रासाद्वृत्त्यनुप्रास इत्यर्थः। अन्ये पुनरिति· वर्णानां वृत्तिर्नि। वर्त्तनाधिष्ठानं च वृत्तिपदेनाभिमतं आद्यं
संघटनविघटनाभ्यां द्विधा· समस्तव्यस्तभेदेन संघटनविघटने द्विधा· कादयो मावसानाः स्प
र्शाः आदिग्रहणाद्दंतस्थोष्मणोः संघटनबहुलः संदर्भः प्रस्फुटः विघटनबहुलः कोमलः उभयब-
हुल उन्मिश्रः द्वितीयं वृत्तिशब्दार्थमाह। काव्यव्यापी चेति· अत्रापि दोषप्रसंगापाकरणार्थमाह सौ
कुमार्यमिति· अतएव गुणाः शैथिल्यपरुषत्वे तु दोषावित्यर्थः। संयोगासंयोगयोः प्रतियोगिव्यवस्था

४२ विरहात्तकथंद्वादशप्रकारता व्यवस्थितिरित्याशयवानाह॰ कारणंपुनरिति॰ दूषणप्रतिपत्तिसौकर्यन्नित्य सिद्धेवर्ण्यगुदाहियतइत्याह। नास्विति। अप्पंकुदंतेणव्वाप्तवत्ता॰ डुंढुमाइ अंव्वाप्तं॰ डुंढुन्निरंतगेनकां स्यभाजनोनिःस्वोनविशेषः डुंडुहि अंशब्दायितं॰ दकारधकारौतवर्गस्य॰ बकारभकारौपवर्गस्यतृ तीयचतुर्थौ॰ सततशीकरसिच्यमानगैरिकशिलातललुठनेन जलदानांरंजनं॰ विशीर्यपतनेनात्यं तधवलानि ऊ्करा एवहासायस्यतादृशेनदरीमुखेनोत्तःप्ररूढबलकुसुमामोदनिःसरणंरंजितजल धरप्रतिबिंबमृतताम्रनयनोन्मुद्रणात्॰ हासबकुलामोदाभ्यांचजीवतारोपरूपासमासोक्तिर्ध्वन्य तइत्याराध्याः ॐ ऊकरोनि ऊकरः णिम्महिअंनिःसृतं॰ भगवोऽतराः भृगुपातस्यसुरस्त्रीसंगमःफलं॰ अत्रकुर्वन्त्वलौकनिर्वैत्यतेषुमूर्द्धन्यानामंतःस्थसंयोगाः उच्चैःशब्दइत्यादौस्वभावगुरूणामपिपूर्वरू पसंयोगसन्निधौछायाविशेषोलवतीत्या केचित्॰ अनुस्वारपुरोवर्तीति॰ अनुस्वारस्वरूपतदा देशावनुस्वारपदेनगृह्येते॰ तेनशमितहासेत्यादावनुस्वाराभावेपिनलक्षणमुदाहरणं॰ रवांगेति॰ दिविसीदंतीतिघुषदोदेवाःसुषामादित्वात्षत्वं॰ अत्रेकांतरितताःसंयोगाःसंदर्भव्यापकाःप्रतीयंते॰

४२

सोय·मस्याः संयुज्यमाना विशेषेपिवृत्त्यंतराद्विशेषः निष्ठुराद्वै परीत्येन श्लेषोदाहरणं सुगमं·करणिःसा
दृश्यं·सेषा प्रायः कंप्यरेफयोः क्वचिदन्यस्याप्यादिपदोपात्तस्य संयोगो वसेयः बाकुल्यादिभिरिति·बा
कुल्याल्पत्वमिश्रणेः प्रादेशिके रित्यर्थः द्राविडीनामिति·किंचिदुन्नमनं रेचितं·तेनाधिज्यकोदंडक्रि
याकारि भ्रूलतासनाथेड्डःखराज्यभारारोपः सुगममुदाहरणं·तदेतत्परे केषांमतं दूषयति·नगुणेभ्य
इति समता सौकुमार्यादिगुणेषु भारतीप्रभृतिषु चवृत्तिषु यथायथमंतर्भावोवगंतव्यः। अत्यनुप्रा
सवृत्त्यनुप्रासयोरिति विषयसप्तमी·वर्णावृत्तेर्वृत्त्यनुप्राससाधारणत्वात् ततो वर्णानुप्रासं विशेष
यन्नाह·यथाम्रानकेति·स्रगादेर्वर्णस्थानीयावर्णावृत्तिर्वर्णानुप्रासः तत्रोपमानभूतवर्णादिवर
णं समानजातीयकुसुमादिविरचितमालापटप्रभृतिषु यदंतरांतराविजातीयाम्रातकुसुमादिस
न्निवेशनं तद्वर्णइत्युच्यते तद्वत्यावाचावर्णावृत्तिः सावर्णानुप्रास इति सूत्रार्थः। सद्विधा·संयुक्ता
संयुक्तवर्णनिरूप्यत्वात्·यथायथमेतदुभयप्रपंचनं स्तवकवदाद्योद्वादशप्रकाराः तेषु कचित्
कचित्संयोगावृत्तिः स्तवके वा नूः अनुप्रासविन्यासादिति संयोगानुप्रासविन्यासतः गुंजतां कुंजरा

४३
43

णामकांडकंडूलगंडस्कंधगंधद्वित्यत्रावृत्तिचतुष्केणस्तवकनिर्वाहः स्थानीति· श्लोकपादेपिप्रथमा
दिभागकल्पनेयास्थाननियमविवक्षा· तथाहि· बालेमालेयमितिप्रथमोभागः नीनीदूतिप्रतिभा
सारूढः तृतीयादिप्रथमपादे· एवंपद्मांतरालमलिनमुधामश्रुप्रभृतीनांद्वितीयादिपादेषुप्रथ
मादिभागकल्पनाऽवसेया· कालंकालस्वरूपमेकमद्वितीयं· कालंकपालेत्यत्रलकारावृत्तिःकका
रेणव्यवधानेप्रकृतेकपालेत्यत्रपकारोवर्णांतरंगर्भायमाणउपलक्ष्यते· एवंमालांकमित्यादौल
कारादिगर्भीकरणमवसेयं· विरतसंरतोनिगदेनैवव्याख्यातएव· नमालतीदामेत्यादौप्रथ
मपादेमकारावृत्तिद्वयेनविवरणं द्वितीयपादेसक्तप्रयोगेणतस्यैवसंवृतिः तृतीयपादेनकार
सकारयोरावृत्याविवृतिः चतुर्थेतुनेतिसंवरणं· तदिहभूयोविकाशःकिंचित्संकोचःकिंचिद्विकाशस
र्वथासंकोचपरिपाट्यासंदर्भनिर्वहणंशोभाकरमितिव्याचष्टे अत्रेति· लोलदिति· कपिंजलोगोर
तिरिति: अपरांतोदेशविशेषः पूर्ववलनेनोत्तरग्रहणंचक्रवालं· व्यंजनमात्रवळनमभिप्रेतंतेनवली
वलेत्यत्रापिचक्रवालसिद्धिः एवमुत्तरत्र· क्रमेणेति· द्वावारभ्यैवक्रमसंभवः ऊर्ध्वंचितुर्भ्योविर

४३

सायते· तेन पंचषाणामित्यादिनोक्तं असंयोगस्वराणामित्यविवक्षितसंयोगस्वराणां· गुरुणेत्यनुल्लंघ
नीयाज्ञता· तथाच तत्प्रयुक्त्या दुर्वहनितंबभारालसाया अपि कथं चित्पदविन्यासेन कांतिविशेषो ध्वन्य
ते· स्वभावताम्रयोरपि नेत्रयोस्तत्काले घूर्माश्लेषाद्धि गुणो राग इति उपमानेम न पदपोषः पूर्वार्द्धे द्वयोर्द्व
योरन्तरार्द्धे त्रयाणामनुल्लंघित क्रमाणामेव व्यंजनानामावृत्तिरिति स्फुटं विवरणं· क्रमवृत्तामुप
क्रांतकिंचित्क्रमाणामावृत्तौ तत्क्रम विपर्यासो व्युत्क्रमः स्वाघेति। आवर्त्तनीयो वर्णः स्वपदेनाभिमतः
तस्य पूर्वो यो वर्णस्तद्वृत्तिनास्वरेण सहतस्यावृत्तिः पादमध्यांतयोरेवेति· मध्यसंश्लिष्टोपरितनभाग
घटितसमुद्गकतुल्यतया संपुटोनुप्रासः अंतःपादमिति· वृत्तौ चितीव शाख द्विरवंउल च्छशोभा विशे
षेषु पादेषु मिथुनसिद्धिरवसेया· तदिदमुक्तमुपक्रमोपसंहारयोरिति· मिथुनं द्वंद्वं· विद्वाण इति।
उपघ्न आश्रयः निघ्नः परवशः अनुप्रासजातेरासमाप्तिनिर्वाहोभिमतः व्यत्ययः पुनरन्या अन्या एवाभि
मताः तेन रत्यनुप्रासाद्भेदः अत एव वेणीतुल्यता· तत्र हि किल केशग्रथना निर्व्यूढैव भक्तिः पुनरन्या
न्येति उक्तलक्षणेभ्य इति· पूर्वोक्तवर्णानुप्रासेभ्य इति तथाहि प्रस्तुतोदाहरणे स्थाने स्थाने स्तवकावि

५५

वद्वायां नत्तवकवान्· त्रिभागपरिहारेणनस्थानी· वर्णतिरायानुपपत्तौ नगर्भः संकोचविकाशाभावेनन
विरतसंरतुः चक्रवालक्रमाभावेन नगृहीतमुक्तः। एवंक्रमविपर्यस्तमिथुनबहिर्भावो वगंतव्यः आ
समाप्तिनिर्वहणाभावेवेणीभेदः स्फुटएव· एकवर्णावृत्तेरिति· वर्ग्यवृत्तौ हि कदाचिदेकवर्णावृत्तिर
पिसंदर्भव्यापिनीसंभाव्यते तस्याप्रतीयमानायामेवांतरांतरानाना जातीयवर्णावृत्तिश्चित्रशोभादा
यिनीविचित्रानुप्रासइत्युच्यते· तथा हि· प्रकृतोदाहरणेसंदर्भे समाप्तिं यावदावर्तमाने एव चकारे कां
चनेकांचेतिलयचलदित्यादिषुककारलकाराद्यनुप्रासोद्भटभावेनैव वर्णावृत्तेर्न्यग्भावइवप्रकाशते

कां

चारीसंचरणप्रकारः भोमी आकाशी च· चंचुरोमनोहरः चंचरीको भ्रमरः। अन्ये पुनरिति· विभिन्नार्थै
करूपत्वंस्थानास्थानविभागालंबनं व्यवेताव्यवेतभावश्चयमकछायावर्णानुप्रासवानिति अतिशा
यनेमतुप् सर्वाशास्त्रधीत्यादौ द्विप्रभृतीनां विभिन्नार्थैकरूपाणां व्यवेतानामेव पादमध्यांतयोरवस्थि
तिः एवमव्यवेतमप्युन्नेयं· नात्रवर्णानुप्रासउत्कटइति विचित्राद्भेदः। अतएवोत्तरत्रस्फुटवर्णानुप्रास
मुदाहरति· तेमीशुद्धवर्णावृत्तिप्रकाराः षड्विंशल्लक्षिताः सांप्रतं पदतात्पन्नवर्णावृत्तयोलक्ष्यंतइत्याह·

५५

वर्णावृत्तिरनुप्रास इति· द्वादशधेति वीप्साद्रष्टव्या· समग्रमिति· पदालंबनोऽनुप्रासः पदानुप्रासः तेन पदाव
यवमालालंबनोपि पदालंबन एव तदिदमाह पदाश्रयेणेति· ननु यदि पदावृत्तिरभिन्नार्थं तदपुनरुक्ति
रेव· भिन्नार्थं चेद्यमकान्न भिद्यत इत्यत आह विसर्गेति· बिंदुरनुस्वारः स्थानं कंठादिकं· वृत्तेः पादादिय
मकताभावो निर्वाहः प्रायो निर्वाह इति यो जना· वारणास्यो विनायकः अत्र रणे रणेति शने शनीति का
रंकारमिति भुजं भुजेति पदं तदेकदेशावृत्तिः स्फुरमुपलभ्यते· मसृणं तु कथमित्यत आह सो
यमिति· स नेषधेत्यादौ निषधरूपो वर्णसमुदायः पदैकदेशतामापन्नः साधारण एव· तदत्रदंतुर
ताकीदृशीत्यत आह अत्र निषिद्धेति· संपुटवदेकरूपस्यैव खंडस्य निरंतरमावर्त्तनं संपुटः· तत्कथ
मिव कं संशब्दे रंतरायेसं पद्यत इत्यत आह· अत्रे वशब्दस्येति· करोति किं किरोतो यमित्यादौ मध्येशि
लीमुखानुशिलीमुखानिति प्रथमं संपुटं· तस्य बहिरावरणभूतं समाकृष्य समाकृष्येति द्वितीयं त
स्यापि किं किं रातेतेति तृतीयं तस्यापि करोति करोतीति चतुर्थं· तदेतद्विपरीतव्याख्यया व्यंजयन्नाह अत्र
करोतीत्यादि· कुलेति अत्र प्रथमपादे कुले ति अविवक्षितस्वरादिवर्णयुग्ममक्षरचतुष्टयव्यवधा

रातः किंकि २

४५

नेनकुलीत्यावृत्तं· द्वितीयतृतीयपादयोस्तु सुखदसुखेति अज्ञव विज्ञवेति चैकवर्णव्यवधानेनावृत्तिः चतुर्थपादेतु भव भवेति रीति भंगो न च दोषः। प्रतीत्यव्यवधानात्· यैचित्री विशेषेणालंकारभावः भासयतीत्यादावाद्यंतयोर्दूरान्तरितैवावृत्तिः स्थाननियमस्तु न विवक्षितः। तदिदमुक्तं स्थाने स्थानइति· जोण्हा उण्हा रिसोरसो इत्यादि का प्रतिपादं मध्यांत स्थाननियमेनावृत्तिः त्वतार्पितः त्वारः जलार्द्रो जलार्द्रवस्त्रं· पाराभिधाना नदी अपारा पाररहिता सिंधुर्नदी सिंधुनामा· विशाला उज्जयिनी· शालाभि रित्ती त्थैभूतलत्तणेष्ट तीया· अत्र पारापारेति सिंधुसिंधुरिति दग्रेदग्रे ग्रे ग्रो इति शाला शालेति क्रमेण प्रथमादिपादेषु द्वयोर्द्वयोरेवानुप्रासयोर्विन्यासः यद्यपि तृतीयपादे गिरिगिरीति द्वितीयमपि मिथुनं संभवति तथापि वर्णाद्वियव्यवधानादनुल्लेखीत्युपेक्षितवान्· शिरसीति· शरभोष्टापदः क्रोडो वराहः रुरुर्वेडु श्रृंगो मृगः हरिः सिंहः स्वरभागाविवत्तायांव्यंजनयुगलावृत्तिर्मिथुनं· तदेवावृत्तिर्भूम्नामिथुनावली· शरशरेति· क्रोडक्रोडेति करकरेति रटरटेत्यादिनाक्रमेण सुप्रत्यभिज्ञानैव· गृहीतमुक्तोयथेति· पुन्नागः पुनातइति प्रसिद्धः केसरो बकुलः भावना वासना·

४५

सुरभिर्वसंतः नानामधुपानलालसानामितस्ततः षट्चरणानां चरणांक्रमणं· अत्र चक्रवालक्रमो व्यक्त ए
व· आवृत्त्याधिक्याभावाद्गृहीतमात्रस्यैव मोचनं· पुनरुक्तिमानिति· वाच्याभेदात्पुनरुक्तिः सा यस्मि
न्नावृत्तिलक्षणेनानुप्रासे स पुनरुक्तिमान्· तात्पर्यभेदात्त्वनदोषः धूमज्वलनरसनानामाकाशदेश
व्यापितया धनुःप्रकर्षद्वारेण रामभद्रगतो महाशक्तिधननात्मकतवीररसपोषः अत्र धूमधूमे
त्यादिना वाच्यभेदः। ननु वर्णावृत्तिरनुप्राससामान्यलक्षणयुक्ता न चासौ पदाद्यावृत्तावस्तीत्यत आ
रि ह। वर्णावृत्तिरिति· समुदायावृत्तिरपि वर्णावृत्तिरेव· नहि वर्णातिरिक्तः समुदायो नाम· इयांस्तु विशेषो
यत्पूर्वजातीयतानुसंधानमलंकारतां प्रयोजयति· तत्र च कार्यानुमेयः समयसन्निकर्षविशेष ए
व प्रयोजक इति· तदिदं दिङ्मात्रमुक्तमन्येपि पदानुप्रासप्रकाराः स्वयमुत्प्रेक्षितव्याः इत्याह लाटेति·
गतिः प्रकारः क्रमप्राप्तं नामद्विरुक्त्यनुप्रासं विभजते· स्वभावत इति· यद्यपि पदानुप्रासोदो नामद्वि
रुक्तिरतिव्यापिका तथाप्यर्थेपि दोपोपनिपातिनी सह विवक्षिता। अर्थो द्विविधः आभिधानिक उपाधि
श्च· आद्यो गोणमुख्यभेदेन द्विप्रकारः द्वितीयोपि वीप्साभीक्ष्ण्यादिरनेकविधः द्विरुक्तिरपि नाम स्या

रीरसंपादिकानाम्नः सतश्चेति द्वयी बोद्धव्या · अतएव द्विरुक्तस्यैवाभिधाशक्तियोगात्स्वभावतइत्युक्तं· कु
र्वंतइति· चलाचलाश्चंचलाः। चलतेरच्प्रत्ययेऽभ्यासस्याकिरूपं· गुडुइत्यव्यक्तानुकरणस्यडाचि
द्विर्वचनेचगुडुगुडेति नामसिद्धिः। अत्रकलकलादिपदानामर्थवशायातद्विरुक्तिशरीराणांस्वभाव
तएवयथोक्तरूपव्यवस्थितिः। अमृतममिति। अत्रद्वितीयानाममृतादिपदानांद्विपुनरुक्तिदोषेणता
त्पर्यापर्यवसानादमृतादिगुणपरत्वेकल्पनीयेपिनिष्कृष्टगुणपराणांसामानाधिकरण्यानुपपत्ते
स्ततदसाधारणगुणोपबृंहितामृतादिनिष्ठानामाघपदोपात्तसामान्यापेक्षो विशेष्यभावश्चविशेष
णत्वंचनिर्वहति· नचपर्यायनिवेशोर्थांतरसंक्रमितवाच्यतासंभवतीतिपूर्वाचार्याः सेयंगौणार्थप
रवशानामद्विरुक्तिः। शैलेशैलइति। नानार्थानांयुगपदेकैकेनपदेनकेनचिदुक्तुव्याप्तिविवक्षावीप्सा·
साप्रयोक्तृधर्मोद्विरुक्त्याव्यज्यते· अतएवयाकाचिदर्थसामर्थ्यादृष्टाद्विरुक्तिः सासप्तपर्णादिवन्ना
मद्विरुक्तिसमाख्ययाप्रतिपाद्यते· शैलेशैलइति अत्रकिंचिदेकमसाधारणगुणा अयंविवक्षन्नस्य
ते ज्ञातीयेतदितरस्मैतगुणसंस्पर्शमसहमानोऽप्रस्तुतमेवशैलादिकंप्रस्तुतवान्· रोहणादिव्यति

रिक्तासु व्यक्तिषु माणिक्याद्यभावगुणव्याप्तिर्युगपदेव विवक्षिता· शब्दात्तु उपसर्जनतया प्रतीयमानः
सिद्धस्वभावः पदार्थो गुण इत्युच्यते· एवं क्रिययापि व्याप्तिरवसेया· सोऽयं द्रव्यवीप्सेति शैलादीनां द्रव्या
णामेकेन गुणादिना व्याप्तुमिच्छेत्यर्थः। प्रकारे गुणवचनस्येति· प्रकारः सादृश्यं तत्तु पूर्णगुणेन न्यू
नगुणस्य साधारणगुणान्वये भवति· एवं चास्ति समानशब्दाभिधेयत्वं च व्याप्तिः इयांस्तु विशेषो
यदेकत्र सिद्धस्यान्यत्र प्रतिबिंबनं सादृश्यं शुद्धवीप्सायां तु युगपदेकस्य नानापदार्थसंबंध इति·
सोऽयं वीप्साप्रकारशब्दार्थः अत एव प्रकारे गुणवचनस्येति पृथक्सूत्रितं· इह तु वीप्सापदेनैवाय
मर्थ उपग्राह्य इत्यभिप्रायः। मंदं मंदमिवोदित इति क्रियाविशेषणमुपमितमेवं भीतभीत इति क
र्तृविशेषणमपि सादृश्यलक्षणगुणोत्प्रेक्षायामिवशब्दः। आभीक्ष्ण्ये नेति· नित्यवीप्सयोरित्यनेन नि
त्यत्वमाभीक्ष्ण्यमुक्तं· यां किल क्रियां कर्तृप्राधान्येनानुपरत्याचकर्तुमिच्छति तद्रूपमाभीक्ष्ण्यं। अत ए ६
व तिङव्ययकृतां च द्विरुक्तिरियमसाधारणी· उभयत्रैव क्रियाप्राधान्यप्रतीतेः सिद्धे हि वस्तुनि पौनः
पुन्यप्रतीतिः क्रियोपाधित एव न स्वरूपेण· ननु णमुले वाभीक्ष्ण्याभिधानात्किं द्विरुक्तिः करिष्य

तद्व्यतत आह· सर्वमिति· न चाभीक्ष्ण्यं णमुलो वाच्यं· क्त्वार्थे तस्याभिधानात्· द्विरुक्तिसहितस्यैव तस्या
नुपरतिव्यंजकत्वात्· स्वरूपाभ्यामंतरतमशब्दद्वयरूप आदेशो वा द्विरुच्चारणं वा द्विरुक्तिशब्दार्थः
न चावश्यं द्वावेव शब्दौ प्रयोक्तव्यौ किंतु यावद्भिरभिमतोर्थः प्रतीयते तावंत आभीक्ष्ण्यप्रत्ययाः प्रयोक्त
व्याः· तेनाव्ययकृत्सु दृश्यंते किंतु तिङ्पदेष्वेवेत्याह क्रियापदेति· यद्यप्येकैकवाक्यार्थसंगत्या क्रिया
पदस्य द्वयमेवोच्चारणं तथापि काव्यापेक्षया बाहुल्यमवसेयं· आदिग्रहणेनेति· तत्र तत्रेतरप्रकरणप्रा
पितानां द्विरुक्तिप्रकाराणामादिपदेनोपग्रहो विधेयः तद्यथा· अर्वागर्वाग्बलवदुपलग्रंथयः देत्र
शैलाहूरेहूरे मणिमयद्युषन्मेखलो रत्नसानुः। आराद्दारान्निधिरयमपां यद्वीयो द्वीयान्नुग्धांभो
धिस्तदयमसमुद्रस्थितिरेवादिशिल्पी। अत्रानुपूर्व्ये द्वे भवत इति द्विरुक्तिः एवं स्वार्थेऽवधार्यमाणे इत्या
दयोपि द्विरुक्तिप्रकाराः स्वयमवसेया इत्याशयवानुपालक्षणात याकिंचिदुदाहरति· निर्मूलकाष
मिति· कषादिषु यथाविध्यनुप्रयोग इति तस्मिन्नेव प्रयुक्ते द्विरुक्तिसिद्धिः। संभ्रमेणेति· भयसं
वेगादरात्मकः संभ्रमः संवेगस्त्वरा· सैव प्रकृतोदाहरणे द्विरुक्तिं प्रयोजयति· ननु हर्षादिना मह

कविप्रबंधेषु द्विरुक्तिरुपलभ्यते· साकथमुपग्राह्येत्यत आह हर्षेति· हर्षादयोपि संभ्रमप्रयोजकास्ते
रसाधारणतामापन्नैरवच्छिद्यमानः संभ्रमोन्योन्यो भवति· नच संभ्रमतां जहातीति संभ्रमद्विरुक्तिप्र
कारएवायमित्यर्थः॥ निगूढगंभीरउद्वेगआवेगः ननु कंचुकं कंचुकमितिवन्मुंचेत्यादिकमप्यावेगसंभ्र
मप्रभवमेव तत्कथं न द्विरुच्यत इत्यत आह अत्रेति· कंचुकस्य हारेणहारस्योत्तरीयवाससा व्यासंगसंभावना
संभ्रमहेतुः संभ्रमेयावद्बोधमितियावद्वद्वार्थमाविः कुर्वाणः पूर्वोक्तमभिप्रेत्याह· एवंत्रिरुक्तिरपि· उप
लक्षणं चेदं· चतुरादिद्विरुक्तिरदंडवारितैव· समभिहारोत्र दोत्वं· ननु वाक्यार्थप्रयुक्तैयेव काव्यस्यसना भृश
यीकरणात्किमनुप्रासेनेत्यत आह। जायतेनचेति· उदाहरणेनालंकार्यसंकरवदलंकारसंकरोपि लो
कप्रसिद्ध एव शोभाहेतुरित्यभिमतमिति· क्रमप्राप्तं लाटानुप्रासं लक्षयति· अर्थाभेद इति· लाटजन
वल्लभोनुप्रासो लाटानुप्रासः अर्थभेदे कथं न पुनरुक्तिदोष इत्यत उक्तं प्रवृत्याभिन्नयेति· ता
त्पर्यभेदेनेत्यर्थः अत एव यमकाद्भेदः सचेत्यनुक्तव्यवहितसमुच्चये चकारः लाटानुप्रासः सा
मान्यतो द्विधा· अव्यवहितो व्यवहितश्च· अनावृत्तशब्दानंतरितो व्यवहितस्तदंतरितश्च व्यवहि

४८ तः तयोरव्यवहितः षोढा भवति व्यस्तः समस्तो द्वावुभयाविति तावच्चत्वारः तत्रोभयद्वयं द्विप्रकारकमिति
सामान्यविशेषभावाभ्यां षड्भेदा व्याख्येयाः उभय पुनरिति पुनःशब्दो व्यावृत्तो पूर्वस्मादन्य एवायमेक व्या २
शब्दाभिलप्य इत्यर्थ आद्यो भयद्वयमग्रे वक्ष्यते द्वितीयं तु चक्रवालगर्भश्चेत्युक्तं व्यवहितस्य तर्हि कि
यंतो भेदा इत्यत आह यस्त्विति तेन व्वद्धमावावांतरविशेषतया नायं समशीर्षिकया गणित इत्यर्थः
तेघिति द्विरुक्तशब्दरूपेषु पूर्वपरयोर्नैकमपि समासांतर्गतमिति व्यस्तं [illegible] एतेन समस्ताद्ययो व्याख्या
ताः धैर्यगुरुतास्थितिगांभीर्यानुनिष्पादीवागनुभावो रसपूर्णकुंभोच्छलनन्यायेन सात्त्वादिवतत्प्रक
र्षमर्पयन् शोभाविकाशहेतुः। समुपकुर्वंतो समभिक्रामन्तः ननु जसे एणधीरेण गुरुइ आइं विइ्व रवेण
ण अइति पदपंचके विभक्त्यात उत्तरयोश्चकारद्वयेन च व्यवधानात्कथमव्यवहितभेद उदाहृय
त इत्याह। अत्रेति अव्ययानामित्युपलक्षणं द्योतकत्वादिति विभक्तिसाधारणो हेतुः पंचकप्रातिप
दिकार्थत्वपक्षे विभक्तिद्योतिकैवशाकत्योपीति अव्ययवाचकत्ववादी सोप्यसत्वार्थानामिवादीनां ४८
स्वातंत्र्येण वाचकत्वं न मन्यते यतो न एथा क्यदत्वमनुशिष्टवान्तः तथा च द्योतकानां परशक्तिसहकारि

रित्वेन तदनुप्रवेशात्त्वांगमव्यवधायकमिति न्यायात्· ननु किमत्र क्लिष्टकल्पनया· अस्त्यव्यवहितो
दाहरणमप्यन्यदपीति शंकते· यद्येवमिति· अत्र पूर्वार्द्धे वर्त्तिद्वयमुदाहरणं उत्तरार्द्धवर्त्तिनोद्वयस्य पू
र्वतुल्यत्वात्· परिहरति· अस्तीति· अनन्वयभ्रमात्र मंत्रोदाहरणं· तत्र चावश्यं भेदकल्पनया विशेष
णविशेष्यभावो वाच्यः तथा च गोणीनामद्विरुक्तिः स्यादिति संकरशंकया नोदाहृतमिति सिद्धांततात्प
र्यसंक्षेपः। पूर्वैः पुनरिति· समस्तानंतरं व्यस्तविवरणं प्रतिपत्तिसौकर्यार्थं· द्वितीयमुभयं विवेचय
ति· स्वापेक्षयेति· तिमिरांधाश्चक्रवाकाः एणीनेत्ररश्मिनेः यथाश्रुतिद्विरुक्तः पूर्वैः पूर्वैन्नरेण समस्तइति पूर्वे एणोनरश्मे।
स्माद्विशेषः। सकौतुकाकृतकं कणावंधादिपरिणयमंगला अनेकगुणा इति· आवृत्तिद्वैगुण्यादिनाने
कगुणत्वं न च गुणानामियत्तावधारणकारणमस्तीत्यभिसंधाय तस्येयत्तानशक्यते कर्तुमिति
पूर्वमुक्तं· स्वेषामात्मीयानां मध्ये यः कश्चिद्दोषः तत्र दमादंडप्रकारान दृश्यं तद्इति· यद्यप्येक परिहा
रे प्रकारोदाहरणद्वयमुचितमेव तथापि किंचिद्विशेषं विवक्षन्नात्रिष्यसमाधत्ते नन्विति· मा भूदत्रा
समासोऽन्यथापि नेदमुदाहरणमिह संगतमित्याह न केवलमिति· तत्किमनुप्रासएवायं न भवतीति

एव्वति। केनतर्हीति· उत्तरंपदानुप्रासेनेति· पदानुप्रासेनार्थभेदो भेदे विवक्षितौ· किंतुपदाश्रयेणावृत्ति
मात्रंपदानुप्रासावृत्तिश्चलाटानुप्रासेप्यस्तीतिसंगत्यात्रेदमुदाहृतमित्यर्थः शातवृतिर्ब्रह्मा· तस्यजी
वनभूतमंभोरुहृपद्मंकृपोगुणावृत्तः दशास्विच्त्येकोदशशाद्वोव्यस्तः अन्येत्रयःसमस्ताःननुव्यवहित
एवकिंगुणानादिभेदोनेत्याह अव्यवहितेपीति· वस्त्रायंतइत्यादौकाशपदपरिहारेणोदाहरणं· तत्र
हिप्रथमःकाशशब्दोभिन्नार्थएव· व्यवहिताव्यवहितयोरेकवाक्यानुप्रवेशोस्ति· तत्रापिगुणनाभेदउदा
हरणीयः। दृश्यतइत्यनेनयद्वद्व्यवहितेभ्र्यसीगुणनामहाकविप्रबंधेषुप्रतीयतेनतद्वदव्यवहितेपी
तिपूर्वंव्यवहितमात्रेगुणनादिकमुपन्यस्तमितितात्पर्यं। घनेरिति। अत्रघनपदंव्यवधानेनवह्नीगु
णनामवलंबमानमेवचतुर्थपादेत्वव्यवहितानुप्रासेपिप्रविष्टमितिभवतिव्यवहिताव्यवहितभेदता·
सोयंपदाभ्यासोदर्शितः एवंश्लोकाद्यभ्यासोव्यवहितव्यवहितभेदएवभवतीत्याह। योपीति· श्रद्धायत्ता
विति· अत्रयदिस्यातामितिपादभागेनसहपादावृत्तिस्त्रिभागावृत्तिर्भवति· मुखेनेति· फुल्लपंकजमिव
चारुफुल्लेनपंकजेनचारुरितियद्यपिवृत्त्यर्थोमिद्यतेतथापिपदानामभिन्नार्थत्वादुदाहरणता· अ

र्थाभैदइति·नार्थशब्दोभिधेयवचनः किन्तुशब्दप्रतिपाद्यमात्रवचनइत्याशयवानाहइवादीति·नन्वन्येपि
पदावृत्तिप्रकाराः किमितिनोदाहृताइत्यतआहयमकानांहीति·भेदभक्तयोर्वैतरप्रकारविछितयः स्थाना
स्थानपादभेदलक्षणाः श्लोकावृत्तिःपरमत्रनास्तीतियमकादपकर्षःप्रकरणंतेनुप्रासव्युत्पादनप्रयोज
नमाहउपमादीति·अनुप्रासलेशोपीति·वर्णाद्यनुप्रासः श्रुतिवृत्त्यनुप्रासोतुसंदर्भव्यापकावेवप्रशस्ताविं
त्युदाहरणव्याजेनाह कुंडलादीति·एतदेवखंडसरस्वतीकेषुकविषुनतथाकाव्यसिद्धिरितिदर्शयन्
दृढयति·श्रुतिवर्णानुप्रासाविति क्रमप्राप्तंचित्रलक्षणमवतारयतिवर्णेति·चित्रमालेख्यंतदिवजी
वितस्थानीयध्वनिरहितंचित्रमितिकाश्मीरकाःतदसत्‌ध्वनेःप्राधान्यानंगीकारात्·प्रतीयमानमात्रा
भावस्यक्वचिदप्यसंभवात्·यद्वाआकृतिविशेषयुक्तंचित्रमितितदपिन·अव्यापकत्वात्·अतोवर्णादि
नियमेनप्रवृत्तमाश्चर्यकारितयाचित्रमित्येवयुक्तं·वर्णाव्यंजनानि·स्थानंकंठादि·स्वराअकारादयः
आर्यंकारःपद्माद्याकृत्युन्मुद्रणं·गतिःपठितिभंगविशेषःबंधोविरिंडितिप्रभृतिःपंचप्रभृतिनियमे·नंत
थाशक्तिव्युत्पत्त्योरुत्कर्षइतिचतुरादिग्रहणाति·तत्रेति·अवश्यंयोद्धाजाजीजजेयुद्धार्थादावश्यकेणि

५०

निः जजौः युद्धशौंडाः तेषामोजसा जातायाआजिः संग्रामस्तं जयतीति क्वि पु॰ तं वेणु॰ दारिणं ततोनंतरं अ
तितता रचतुरंगबलेन प्राप्तविस्तारान् आतिनः सततगमनशीलान् तुदतीति क्वि पु॰ भानोदीप्तताराऽनुरू
पाणां शुक्रबृहस्पत्यादीनामाभेवाभा कांतिर्यस्य उपमानपूर्वपदबहुव्रीहौ उत्तरपदलोपे च भामः
अभियो भयशून्या निर्भा नभिभवतीति क्वि पु॰ अजौ भामिभूः तादृशीया नौ तेजः तस्या भूरा श्रयः आर
जगाम अरिः शत्रुः वलभ्रद्व इत्यर्थः अरीणरीः संचरणं रीङ् गता विति धात्वनुसारात् तस्या ईरोऽचून
नं राति ददाति अरिरीररः। देवः स्थितिसंहारक्रीडारतः। दानवनंदी। हिरण्यकशिपुः तस्य दानेखंडने
योनादः वद्धः कपारपारनकरकरा शङ्कः तेन दिवं स्वर्गं दुद्राव किमेतदित्याकस्मिकसंभ्रमेणोपता
पयामास॰ जगत्कंटकनिराकरणाद्देवानां नंदनआनंदकृत् वेदनिंदिनां चनोदनः प्रतिक्षेपकः
सामान्याभिप्रायेणैकवचनं हरिभिर्बहुभिः भारिभिः प्रकृतिसारभारवाहिभिः अतिप्रमाणकायत
या भुवो भारभृतैः अंतः कांस्यभाजनेनेनिः स्वानो भेरीतद्वद्भिर्भिनिः रिभ शब्दे इति धात्वनुसारात्

५०

अभ्राभैः प्रथमोन्नतमेघकांतिभिः इभैर्हस्तिभिः भियं राति प्रयच्छतीति भीराः इभाः प्रतिद्विपाः अ

भिरे भिरे· अभियुक्ताः। ननो· नानानना: विविधाकारवदनागणाः ऊने नहीनेन नुन्नो जितो ना· न· ना· नपु
रुषः· तथानुन्नः इनः प्रभुर्षो विषयात्मा जर्जरस्स्वरो वा· अकारो मूररूपे तु थकारो विषयात्मनि· अकारो गाय
नेप्रोक्तो अकारो जर्जरस्वर इत्येकाक्षरकोशादित्यपि कश्चित्रेयस्यसो प्यात्मनि जीवति पुरुषोऽपुरुष ए
व· यतो ननु न्ने नो ऽजित प्रभुः नुन्नोप्यनुन्न एव· तथानुन्ननुन्नः जित इव क्लीबतया पराभूत इति प्र
कारेण गुणवचनस्येति द्विरुक्तिः तमपि योनुदति स नानेनानन निष्पापः बंधच्छायापेक्षान्यवर्णगुरुत्वोन्मे
षमात्रप्रयोजकस्तकारो न वृत्तिशरीरांतर्गत इति द्विव्यंजनतानाशंकनीया· क्रमस्थेति· वर्णसमाम्ना
ये येन क्रमेणाकादयो मावसानाः पठितास्तेन क्रमेण व्यंजननिवेशः। कः खगो घः तत्र त्वसिद्धावदान
पक्षिसमूहः तमंचतीति क्विनि संयोगांतलोपे कृते च खगो घाङि· तिरूपं· चितं संविदं छ्यति छिनत्ती
ति चिच्छं यद्रो जस्तन्नास्ति यस्यासावचिछो जाः झमु अदने अस्मात् क्विप्· अनुनासिकस्य क्विझ
लोः क्ङिति त्युपधादीर्घः मोनो धातोरिति नकार इति झान् परबलभक्षकः पंडितः स्तो श्चुना श्चुरिति    ग्रं: २
नकारस्य ञकारः अटाः संख्यामां गणपर्यटनशीलाः सुमटास्तानो गतेबाधत इति क्विप्· उग्गता

ञो विषयात्मा जर्जरस्स्वरो वा· अकारो मूढरूपे तु थैकारो विषयात्मनि। अकारो गायनेप्रोक्तो अकारो जर्जरस्वर इत्येकाक्षरकोशादित्यपि कश्चित् २

५१

५।

विति धातोरूपं· तेषामीढ् ईश्वरः अडढणोड च पलः डंट एण्इत्यव्युत्पन्नं चपल·वाचि प्रातिपदिकं तथा अभी
र्नयरहितः।एवंविधः को नामायमुद्दधीनूपफबे·पूरयामासेति प्रश्नः उत्तरं अरीनूलुनंति या आशिष
स्तासां सहः क्षमो मयोरैत्यराजइति·छंदो त्तरेति।म्यरस्तजभ्नगा लांता श्छंदो विचितिवेदिभिः।दर्शि
ववर्णानिर्णीता श्छंदोरूपप्रसिद्धये·तन्मात्रव्यंजननिबद्धं छंदो त्तरव्यंजनं· सुबोधमुदाहरणं· षड्ज
दीति·सरिगामपधानिश्च वर्णाः सप्तस्वरादयः।षड्जादिकृतसंकेता दृष्टा गांधर्ववेदिभिः।तन्मात्रव्यंजन
मयं षेड्जादिव्यंजनं· सह एन विष्णुना वर्तते इति सा लक्ष्मीः अरीन् धमति तापयतीति धमतेर्त्युटि बकुल
वचनमन्यत्रापीति धमादेशः एवंविधामममत्र्या दिति शेषः निधा निनी·पद्मादिनिधानवती·साम्नः सा
त्वस्य धामगृहं· धनिनां धामसाधनी·तेजः प्रसाधिका·मानिनी पूजावती सगरिमा गौरववती अपपा
पाप्निः कलुषान्पातीत्यपपापपाः सेति प्रसिद्धविभवा आपगा नदी तत्तुल्यः हृण विसर्पि भंगुरः समा
गमो यस्याः सा तथा·असमा अनुपमा·मुरजेति पाठा त्तराणि मुरजे लहकारो तथ दधाच्छमो रेफः।न

५१

णाकखगघङश्चे त्लं षोडशभरतादिकथितानि·तन्मात्रविरचितं मुरजात्तरव्यंजनं·सुवोधमुदाहर

णां वर्णानां स्थानेष्वपि चतुरादिनियमेन चित्रं ॰ यद्यपि चाष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा ॰ जि
ह्वामूलं च दंताश्च नासिकोष्ठं च तालु चेति ॰ तथापि जिह्वामूलीयस्य स्वरत्वाद्योदुरस्यं नासिक्ययोः का
व्यप्रवेशाभावादुरो नासिका जिह्वामूल पर्युदासेन स्थानपंचके चतुरादिनिरूपणां ॰ हे सचिरु चिधीः श्रुचि
भिः शुद्धाभिः नुतिभिः स्तुतिभिर्यथोक्ते विशेषणां विरिंचिं ब्रह्माणां धिनु प्रीणयेति ॰ अकुह विसर्जनीयाः कं
ठ्याः । कुंडलरत्नौघ रावम घवतो धनुस्तेन कर्तुः रः मे घनादनामा राक्षसः । इच्युयशास्तालव्याः । चंद्रीशमि
श्रः परमेश्वरेणैकशरीरतामेत्तः मुख्यामराब्रह्मादयः तुलसादंत्याः । अघनइति ॰ शरत्कालशोभया दृ
श्यत मे ॰ उपूपध्मानीया ओष्ठ्याः । तेन कपिंडेन राज्ञा तस्य कोसलाधिपस्य प्रसेनजितः । ऋटुरषास्
र्द्धन्याः निरोष्ठ्यदंत्यमिति ॰ अनेनैव द्विकांतर परिहारेण लोष्ट प्रस्तावो गवेषणीयः । तथोत्तरत्रापि ॰ सदा
नद्य अनवद्य ॰ सदेव प्रियालाभेनानंदुयुक्त ॰ नतांग्याः कस्याश्चिदन्यस्याः संगे संगते तव शोभनांग
नाकामाक्रमणप्राप्तनानारूपतया वर्तते ॰ अतस्तामनुकंपस्वेति सोपालंभप्रार्थनावाक्यार्थः । गां
गकं गंगासंबंधि जलं ॰ तस्य आकः कुटिलागतिः अकुं ग टिलायां गतावितिः तस्यां कस्य तन्मध्यस्य

प ६
ले ५

लुप्त ५

अगकु १

गाहको विलोलकः कुत्सिततमघंपापमघकंस एव काकः तंहतवान् अंघका कहा अन्येतु· विसर्गो
तंपठंति· नरा जहाते विचित्ररूपं· एवंविधस्त्वं गांस्वर्गं अगाः यायादिति· आशंसायां भूतप्रत्ययः कीदृ
शः सन् हानंहाः नहा अहास्तां जिहीते प्राप्नोतीति अहाहं तादृशमंगं यस्य सखगो गरुडः सूर्यो वासौ
कश्चिद्रूढत्वतो यस्य तादृशो गोऽर्थी न्मेरुः तद्दत्तिनः कंकाख्या अगखगावृत्तनिवासिनः पक्षिणः तेपि
आकाककाः गमनस्य रहयालवो यस्य स तथा आसतां तावदन्ये पतत्रिभिरपि अभिनंदितगमन इत्य
र्थः। स्वरचित्रे घेकादिक्रमेणोपन्यासो ग्रंथवैचित्र्यार्थः। उरुगुं विस्तीर्णवाचं· घुगुरुं स्ववीसिनामाचार्यं·
युत्सुयुद्धार्थं निमित्तात्कर्मयोग इति सप्तमी· गीर्वाणमरा श्वुक्रुस्युराता शिरणं ययाचिरे· अत एवपुरुव
४ पुप्पुः कुधातुष्टवुः युद्धप्रयोजनमाह· सुत्सु हर्षेषुलुलुभुः पुरा बभूवुः नुर्वितर्के· सुकुर्मुकुवीरं वारं किंसुसु
कुमोहमासादितवंतः यतः क्रोशनादीनामव्यवस्थेति भावः॥ विधिर्विरिंचिः ई लक्ष्मीस्तस्या इनः प्रभुर्वि
ष्णुः ईशो महादेवः ईजः कामो लक्ष्मीपुत्रत्वात् इला पृथ्वी· जिनो बुद्धः सिद्धा देवविशेषाः मित्रः सूर्यः रैदो
धनदः कुबेरः देवा उक्तव्यतिरिक्ता मरुदादयः एषां संबंधिभिर्धैर्यैर्धृतिभिः स्वैर्वित्तैश्चानेकैरनेकविधैस्तैस्तैः

इंद्रोवासवः २

प्रसिद्धरूपैरहंस्वैरैसुष्ठु आसमंतात्समृद्धो भवानीत्याशंसावैवाक्यालंकारे॰ क्षितिः पृथ्वी॰ तस्याः स्थितिः पा
लनं मितिमनिं क्षितिः संहारः तद्विधिर्वेत्ति॰ निधिसिद्धीले दीतिक्विप्॰ नमनं भग्नते जाद्दत्तोयस्मात्॰ स्मरह
रकामदहन॰ त्र्यक्षत्रिनयनहरमहादेवममस्मर अधीगर्थयोगे कर्मणि षष्ठी॰ श्रीदीप्तीलक्ष्मीतेजसी॰
द्धीकीर्तीलज्जायशसी॰ धीनीतीबुद्धिनयौ॰ गीःप्रीतीवाक्प्रमोदौ॰ इमेयेदेवेशोपिनस्तः तेद्वेद्वे तव एधे
ते वर्द्धंते॰ क्षितेर्विजितिर्विजयः स्थितेर्वर्णाश्रममर्यादालक्षणाया विहितिर्विधानं तदेवव्रतं तत्र रतिर्ये
षां परा श्रेष्ठा गतिर्ज्ञानं येषां ते तथा एवं विधाः कुरवः स्वद्विषां कुलं उरु विस्तीर्णं रुंधुः तदेवगुरुमहत्त्व॰
द्भुध्रुवुः कं पयामासुः। आम्नायानां वेदानां अंत्यावागुपनिषत् सा हिताहितप्रतिपादनपरा किमाह॰ यागीत
यस्ताईतयउपसर्गाः याःप्रीतयस्ताभीतयो भयानि॰ यो भोगः स रोगः यो मोदो हर्षः स मोहः न परमेवमा
ह किं तु॰ यावद्धीयेध्यातव्येत्वेमेक्षुरहितेदेशे विषये मा न्नलक्षणे इन्द्रे दिक्षां कुर्यादिति वा शब्दः समुच्चये॰
अन्ये चकारमेव पठंति॰ हेयेहातव्ये वस्तुनि यावित्लाभः विद्लाभइति धात्वनुसारात्॰ तत्र ये लोभिनो
लोभवंतः तन्निंदनशीलेन तापेन तेजसा र्थीदुग्र श्चंडरश्मिः सममदेहेस्तु॰ तेजस्वीभवानीतियावत्॰

५३

कि मित्येवमाशास्यत इत्यत आह अमृतस्यंदिनि कांताग्रे गुणिनां प्रियतमो ऽद्वेषो ऽ विलंब एव हितः अ
र्थतः समरस्य इति दत्वा शिषं कोपि स्वस्मै कार्मुक कर्मणो जगाम समरं कर्त्तुमिति लक्ष्मीः स्वयं वरं प्र
स्तारहन अभिभूतपावक हयवल्लभो रेवंतः सतत नयो यस्य हत लक्ष अपरतरात्रे मतत्त्वेन संमतो स्तव
याश्रितेत्यादिकमुदाहरणं प्रागेव व्याख्यातं अतः परं हारिहरी व्याख्या साप्यत्रैव लिख्यते तद्यथा यादे
वीपवित्रत्वेनाश्रिता अनीचया तुंगया बुध्या मायायामस्याविद्याविस्तारस्यायासंग्लानिं विच्छेदं याच
नीयायन्तोयातनं नरकानुभवनीयं दुःखं छिनत्ति श्रिया स्तुता अस्य न्यासः। कर्णिकायां न्यसेदेकं द्वे
द्वे दिक्षु विदिक्षु च। प्रवेशनिर्गमौ दिक्षु कुर्यादष्टदलांबुजे आद्यो वर्णः कर्णिकायां श्रितेति पावेति क्रमे
ण द्विकं द्विकमष्टपत्रेषु पाश्रिता श्रियेत्यादौ दिग्दलेषु प्रवेशनिर्गमौ चरस्फारेत्यादि संचरणशी
लः स्फारो यो वरः तं त्वरति ददातीति वरान्नश्रेष्ठानू किरति क्षिपति हृणोति हिनस्ति वेति कर्मण्यण्
गरः कालकूटः तस्य ज्वरः ज्वरणात् तांडवारंभे चलाः स्फालायस्य वलत्त धवलदेह अलवलप्रांशु
शंके कालगलनीलकंठ ज्वलद्देदीप्यमानो भव न्यासः अष्टधा कर्णिकावर्णाः पत्रेषष्टौ तथापरे। तेषां

५३

संधिषु चाप्यष्टावष्टपत्रसरोरुहे। अत्र प्रथमार्द्धे एक एव रेफो ह्यधाक र्णिकायां· अपरार्द्धस्यान्त्येऽष्टौ लका
रव जैर्दलेषु तेषां संधिषन्त्येऽष्टौ लकाराः निशाशीत्यादि· शशी शशचंद्रेश्च नवे भावेन क्तौ स्थित इति शेषः त्वा
महं न नमामि कान्कान्नमाम्येव· न मन्नू भग्नः कामो यस्मात्· नतमुपनतं व्रतं यस्य· संयमिधौरेयत्वात्·
मानन मनश त्रूणामुन्नतिनाशनन्निति पूजासंबोधने· त्वा इति त्वां अनुनयन् विनयं कुर्वाणोयं।
न्यासः प्राक्कर्णिकां पुनः पर्णपर्णाग्र पर्णा कर्णिके। प्रति पर्णं व्रजेद्धीमानिह त्वष्टदलांबुजे। पूर्वं कर्णिकाया
माद्येन करेण ग्रासः ततः शेति पर्णमध्ये शीति पर्णाग्रे परा वृत्त्य पर्णा कर्णिकयोः श कार न कारौ पुनः कर्णि
कान्तो दलाग्र गमागमेपि अयमेव क्रमश्चतुर्दलपद्मे· सासवेत्यादि· सासवा आस्वादितमदिरा· पीवरे
णास्तनाढ्येनोरसानता· सारधामा उत्कृष्टकांतिः सहसा सहास्या· अकस्माद्वा शृंगारोद्दीपनस्वभा
वेन मार्गशीर्षेण हेतुना शोभनेन वाससा चलन्ती ताहे साहसई सर्वनिशीथ्याभिसरणसाहसरसिक
त्वामेति उपगच्छतीति। न्यासः। कर्णिकान्तानयेदूर्ध्वपत्राकारान्तरावलीं· प्रवेशयेत्कर्णिकायां पद्ममेत
च्चतुर्दलमिति सुबोधमेतदिति· षोडशपत्रं नमस्त इत्यादि· महिमनि प्रेमायस्य तन्नमस्य अमतिमतो दा

म्यतीति अमतिमर्द्दम· त्ताम: कलामात्रेणाचूडासंगत: सोमोयस्य· नमनूभग्न: कामोयस्मात्· धाम्नाते
जसाभीमोभयानक: समासकळव्युत्थानहेतुसाधारणी क्षमायस्य· तस्येतानिसंबोधनविशेषणानि
तेतस्मैनम: कुरुतेकश्चिदिति· न्यास:। गोमूत्रिकाक्रमेणास्युर्वर्णा: सर्वेसमा: समा:। मध्येमवर्णविन्या
सात्पञ्चोयंषोडशच्छद:। वर्णामकारव्यतिरिक्ता: समा: मकारसहिता:। समास्समा इति वीप्साप्रतिवर्णं
मकारसाहित्यं बोधार्थं। अष्टपत्रमेवकविनामांकं यथा· रातावघेति· गीर्वाणसुभर: कश्चिद्युयुत्सुर्दै
त्यसेनया। तत्कालकृतसांनिध्यांमायादेवीमपूजयत्। तथाहि व्याजो मायासैववाग्रूपा व्याजशब्दोप
पदंवागभिधानं यस्या: सामत्यं रक्षास्त्वितिसंबंध: रातेंदत्तं अवघंदोषबकुलमाधिराज्यं अवघाआ
धयोयत्रतादृशंवाराज्यं· यया· विशिष्टंसरणं विसरस्तं राति प्रयच्छतिया रसोर्थाद्दीरसं वेत्ति विंदति वाया·
क्षमायां पृथिव्यामपकार: पुत्रकलत्रादिरूपायस्या: सकाशादिति गमकत्वाद्बहुव्रीहि:। राकापूर्णिमाद्वा
दशवर्षदेशीयकन्यारूपावा· पक्ष्माभ: शरीरसंलग्न: शेषसर्पोयस्या: नयनंनीति: तांनयतीति यन्नय
नंदृष्टिज्ञानमिति यावत्तत्तदेवस्वंआत्मायस्या: खेव्योम्नियातीति खया· स्वव्योमारोमारणं कामोवाय

यो

स्याः सा रामा रेमणी रू स्त्रीरू पीवा व्यस्तं विनाशितं स्थिरत्वं यया तुहिनं नयति प्रापयतीति नयतेर्डः प्रत्यये
तुहिन नश्चंद्रः तस्य नहितुर्जे राजूटे वंधयितुः परमेश्वरस्य श्रीः शक्तिरूपा नह्यति बध्नातीति नूहे चिनहं
स्तुति = मासादयतीति सर्वप्रातिपदिकेभ्यः क्विब क्तव्याद्गृतिक्विपि तृजं तस्य रूपं कंसुखं ददातीति
करः तस्य द्वारभूतादस्य वःते पांखड्गादिधारेव धारान्ते त्री राधेति देव्याः पौराणिकं नाम ममेत्यव्ययं मा
वप्रधानं शिवे ममत्वं मांति परिछिंदंतिये वशिनो योगिनः तेषामपि व्यालविद्यां तु इविघाम वतारयति
यासा तथा न्यासमिदं पादाद्दभक्तिभिः। अस्य दृष्ट कर्णिकं कोणेः कविनामांकमंबुजं अष्टभिः पादैर्दृष्ट
दलविरचना वर्णाष्टकं नाम्नो तिष्ठति राजशेखरकमल कविकाव्यनाम लाभाद विभक्तिकत्वमपदोषः ए
तेनेति नामांकपद्मकथनेन चक्रमपिनामांकमवसेयं सत्वमित्यादि। हरेर्नादं सिंहनादं रोपेर्वाणो आजिर
भसात्संग्रामहर्षात उद्धुरतरश्रीवत्सभूमिः उन्नततरयः सत्वमालंब्यमानेन विशिष्टमिति तद्विशेषणां प्रा
प्तपापविनाशः सुदाहर्षेण अपगतभीः शत्रुहरिणव्याधः अभ्रमाकाशं पिदधे तदा तस्मिन्काले सिंहनादं मु
क्ता इति संवंधः। न्यासः पुरः पुरो लिखेत्यादानत्रत्री न्षडरीकृता नूतु यंतु भ्रामये न्ते मो नामांकश्चक्र संवि

न्यासः निविष्टा ष्टदलं ६

५५

धिः। पुरःपुरो लिखित्वान्यान ग्रे लिखेत्। यथा षडाराः संपद्यंते· यथावा शुद्ध मित्यादि चक्रं· मेममगवि वाचि शुद्धं अ
कलुषं धमद्दि क्रांतं उद्धमें ईदृशं यद्रजः। रजस भावस्तस्य पदं स्थानं तद्भ्रष्टं विनष्टं यस्मात्· अस्ता विधिर्दिग्देव
पारतंत्र्यं यत्र तथाविधं· शुचाशोकेन चनवक्रीकृतं अनुपहतं अदभ्रमुपचितं यद्गृदं कल्याणं तत्तनुविस्ता
रयेति प्रार्थना· बद्धैरलंकारीकृतैः सुराणां ब्रह्मादीनां सारैः शिरस्तदस्थिभिः बद्धमुंडमालाभिः भयानकं· रुजां
रोगाणां जयेनातिस्थिरः अक्षीणेनोपचितेन चं चञ्चुवासाद्भुदेन गवा वृषेण लक्षितः तथ्य मिति क्रियाविशे
षणं· चिंतिता गुप्तिर्भूतीनां रक्षा येन· चारोरमणीयः उग्रो महादेवः त्वमप्रांशुः सर्वस्मादुच्चैः पदे स्थितः भवा
नीरुचा वामाई स्थितपार्वतीकांत्या रम्यः तन्वितिसंवंधः। अत्र पूर्ववदेव न्यासः अंकास्तु चत्वारइति विशे
षः। इदानीं गतिचित्र प्रस्तावः। वारणेत्यादि· वारणा एव अगाः पर्वताः तैर्गभीरादुरवगाहा सारा श्रेष्ठा· नियं
यं येन यांति तादृशा नागणानामारवो यत्र· सारो वाभीरा गणाः रवो यत्र· कारितः कृतो रीणां वधो यया· स्वार्थे
णिच्· आसेधः परैः प्रतिषेधः ते नहीना न्यवरिताः सुभटैर्युद्धे थेमाकृता अरयो यस्यां मानतया· वरई प्साया
मिति धातोः क्तप्रत्यये वरितेति रूपसिद्धिः अत्रायुक्त्यादयोः प्रथमतृतीययोरानुलोम्येन वर्णाविलीन

५५

हीत्वात त्यतिलोमरूपो युक्त्यादौ द्वितीयचतुर्थौ ग्रस्येते· पठितेर्वर्णाद्व्यंतातिरसंचारो गतिः तन्नियमनेनचि
त्रंगति चित्रं स चात्र यथाक्रमरूप एव· हे अमरणाः मरणरहिताः निशितखड्गरतः भयशून्यश्चरुचा तेज
सा·न्येजते न कंपते· यो हि भीतः स कथं शाद्वयमानाशनशीलरक्षःपिशाचादिसंकुले जन्ये संग्रामे चा
रुणा कीरतुरगादिना· रमते न कथंचिदित्यर्थः॥ ॥अत्र संदर्भसमाप्तिपर्यंतं यावर्णमालागृहीतासेव
समाप्तेरारभ्य प्रत्यागत्या यावदारंभं समाप्यत इति· पूर्वत्वद्वैनैवमिति· वाहनेति· ततोनंतरं वाहनासे
ना अनमानतिश्चन्या अजनि जाता· सारा जावुत्कृष्टसंग्रामे· परमानासे परमानक्षेपके मत्ताः सार
गाः सोत्कर्षगतिशालिनोरा जेभारा जरद्विनो यूत्र· भारिणः स्वामिनार्पितसमरभराः अत एव यथो
ना चितचेष्टावंतः तेषां नैनां ध्वनिः सिंहनादो यत्रेति क्रियाविशेषणं· इत्यनुलोमश्लोकार्थः॥ निनिनंतरस्त ध्व४
नंतो जवेन वेगेन हारिणा इभा यत्र· ततो विस्तीर्णः मानवजः सैनिककृत आरावः कोलाहलो यत्र· मा
निजनानां साहंकाराणां वीराणां आहवो द्वंद्वयुद्धं यत्र· ईदृशी सेना रागरसात्परलक्ष्मीहरणरसेनत
मो मेजे क्रोधमवापेति प्रतिलोमश्लोकार्थः॥ इत्यादि· लासन्नत्ये बहला असंकुचिता राद्धुमलीमसा द्रहरे

५६
५८

श्यामा · सालकाम्रकर्णादिपरभागार्पकचूर्णकुंतलवती · रसात् शृंगारात् लीलायस्याः सा तथा तुंगा उच्च
व्यवहारा · एवंविधा सा वाला · हे चतुःषष्टिकलारत · अलालि · लालि ता त्वयेति संस्कृतश्लोकार्थः । कलि
र्लगीतवाद्यनृत्यानां संकरी सहिता करणपरीयसी गा तुं तरला त्वरिता · सा लाली नानावृत्तपंक्तिस्तदीयेन
सरकेण मधुना अलसा · श्यामा मधुरालापा · सेला उत्तमा नारी · सेलास्यादुत्तमा नारीति देशीकोशे ·
सहइ रयामदिरयावर्त्तते सेला वा · रलयोरेकत्वस्मरणादिति के चित् · तच्चिंत्यं · अला भूषयित्री · हवध
वेति संवोधनं · रेहइ राजते इति संस्कृतश्लोकार्थः । एवं भाषांतराणामपि गतप्रत्यागती वोद्धव्ये · विदि

प्रा

तद्दृत्यादि विदिते स्ववीसिनामपि प्रसिद्धे · निजिताः परेषामाजयो युद्धानि येन · तारश्यनीके समरे
प्राप्तंग विपराद्धा नरूपायां वाचि · विगदं त्वद्दयज्वररहितं · के नाम भटाः रोद्धारः न केपि संतीत्यर्थः
तं कं योयोद्धा स न कथमपि नतिं नम्रतां नैति न याति · अत्र तदर्थ एव प्रतिलोमश्लोकः स यथा · न
तिमेति न योद्धा यो रोद्धा रो विगदं गवि । निजितानि जितं यातं केनीके विदिते दिवि । वाले त्यादि । वाला

५६

षोडशवर्षदेशीया शोभनकृष्णकेशी · कांतिप्रदचूर्णकुंतलशोभिता सखा आत्मसंपद्युक्ता · सुतवती ·

तीव्रः
नैं·

पुत्रपुत्रका॰उत्कृष्टाभिमानात्मकशृंगारवती· अभिलषितस्वविवाहादिव्रताकांक्षा· अतस्तांभजस्वेतिहृ
दयेशेषः।न्यासः।क्रमात्पादचतुष्कस्यपंक्तिशः परिलेखिते।तुरंगपदयानेनश्लोकोन्यउपजायते।
ललितोमनोज्ञःप्रवीणःस्वआत्मायस्याःरागेणप्रेम्णानर्तयतियाशोभनदंतयुक्ता· वर्द्धितावासा·
संपूर्णीकृतसकलस्वाना· आलोमृषाव्याहारःतेनसहवर्ततिया· तलेलासकानर्त्तकायस्याःसातथा
भूता· अधःकृतसकलनर्त्तकलोकेत्यर्थःएवंभूतासावालात्वयोपभुक्तेतिवाक्यार्थः।समत्वेति।
सदृशःसमयाःत्वराधिकानांकसन्निनस्ततःसंचरेन्नादोयत्र अतएववीरान्प्रतिरमकत्वमकर्ष
ति· कनीदीप्तो· देवानाकानितुशीलंयस्य· ईषद्धादोयत्र· कस्यमस्तकस्य· सन्नासंगता।आदाग्र
हणंयत्रेतिवा·वाहिकापर्यायवहनं।पर्ययाईर्णोत्पत्तिषितिएवुचू· सेवस्वंवित्रोनतायेषामेवंविधा
येस्वकाआत्मपत्नीयास्तानाजिहीतेइतिविचू· कंमदजलंआकिरतिइतिकाकारस्ताहृशइभभरःहास्ति
कंयत्र· हेअकाकाःसात्विकाइतिसंबोधनं· काकाःसंग्राममलोलुभावा· कचित्कतर्यपिघञ्· निस्वाःनि
रात्मानःभव्याआधेयगुणाःतानपिव्ययंतिस्वबलेनोपरंहयंतियेतेनिस्वभव्यव्याःतेषांभस्वनिभ

५७

सनशीले॰ भसभर्त्सनइत्यत: क्विपू॰ जयदइत्यादि॰ नताइंद्रादयोयस्मैसतथा॰ जगतामेधनोवर्द्ध
न: चंद्रभालंघिनीचंद्रकांतिविजयिनीदन्तप्रभाणामायतिर्यस्यसतथा॰ न्यास: इहशिखरसंधिमा
लांविभूयादर्द्धसमाश्रितैर्वर्णै:। द्विचतुष्कचक्रबंधेनेमिविधौचापरंभ्रमयेत्॰ शिखरमालांसंधि
मालांचपूर्वार्द्धवर्णै: क्रमेणविभूयात्पूरयेत्॰ नेमिविधौचापरंपूर्वार्द्धंभ्रमयेत्॰ द्दृश्यंगारकेमिथो
वैपरीत्येनयत्र॰ त्रिशिखरंहिश्वंगारकं॰ करै: किरणैरासंजयतीतिकरासंज: खेव्योम्निगौरवं
यस्यसतथा॰ हेवनात्मक॰ जलस्वरूपचंद्र॰ कलासुरसमनुरागंसंधायकृत्वा॰ अंत:स्वच्छतया
दृश्यनलो भागनेमिमहलयाकारोल्लेखिनीमेममअगौरीश्यामांशंकांअपनय॰ स्यइतिक्रिया
पदं॰ पूर्णोभवेतियावत्॰ वशेशंआयत्तशंकरमितिक्रियाविशेषणं॰ न्यास: श्वंगाक्रांथिपुन: श्वंग
ग्रंथे: श्वंगंब्रजेदिति॰ द्विश्वंगारकबंधेत्रनेमि: शेषाक्षरैर्भवेत्॰ शेषाक्षरैरिति आद्यात्लकारादारभ्य
यावत्समाप्तिशेषाण्यक्षराणितैर्नेमिरितिन्यास:। अत्रग्रंथिवर्णैरेवराजशेखरस्येतिनामांकवर्णावि
लीलभ्यते॰ विविडितिवंधस्तुपंचश्वंगचक्रं॰ तद्दैवतास्नायेदर्शितं॰ कर्पूरकुंदगौरीतनुमतनुकार्मुकभ्रू

५८

कां॥ वरदानसुंदरकरां विविडितिचक्रस्थितां वंदे। सेति· प्रसिद्धानुभावा· सती गौरी· सरंती निरर्गलप्रसरा·
नत्रस्यती त्यत्रसा· अस्पंदनेन स्थिरेण एनसा कल्मषेण शमिता· विक्लवीभूता· रहितेति यावत्· शम
वैक्लव्ये· अत्र जगति परं सारं यं भगवंतमिता संगता· स च जयी महेश्वरो जयतादिति· न्यासः॥ शिखरा
दन्यतमस्मात्स्मति पर्वभ्रमतिरेखया घाइं। नेमोतदितरदइं विविडित्तिचक्राभिधेवंधे· अन्यतमस्मा
दिति सर्वनामत्वं चिंत्यं· केचित्तु किं यत्तदेकान्येभ्य इतिडतमद्धारिकां सर्वनामतामित्याहुः· गणे चान्य
तरशब्दं नपठंति· व्युत्पत्तिमात्रं चेदमनिर्द्धारिते काभिधायकस्त्वन्यतमशब्दः॥ नमस्त इत्यादि· जग
तां नामरूपप्रपंचस्य गात्रभूत· दानवकुलक्षयेण सहित॥ मुदां हर्षाणां रक्षक अजविष्णो· अत्र जग
तिसतां मध्ये न कोपि तेतव समस्तैतो लक्ष्यः· दयाते नानुग्रहाणामामिति शेषः। न्यासः· चितुर्थेपि च पादे
षु पंक्तिशोले खिते षिह॥ आदेशादेस्तु रंगस्य पादैः· पादः समाप्यते· शेषं सुबोधं· कमलावलिषु पद्मखंडेषु प्र
शस्तेषु हारी मनोज्ञो यो विकाशस्तस्य वोढारं· जनो लोकोनु· वैतदीयं कं शिरस्त्रं को कचिद्धृत· ननगामिकरं

नं२

किंतु विसत्वरकिरणमेव· दिवि वैमानिकपथे सारभूतं· जरतां परिणतानाम नापैरमणं न किंतु प्रीतिकर

५८

58

मेव·तमसांबलहानौयोविलासवशः संततोव्यापारःतेनवरमुत्कृष्टं जनकांतलोकहृदयंगम·जगतामम

नारिंन·किंत्वादिमेव·एवंविधंभगवंतंसवितारंअहं ननमामि किंतुनमाम्येव·न्यासः अष्टादशशिखरच

रीणोमृत्तिकयाचतुष्पदीपश्येत्।यत्राघंनैर्दृष्टांसङ्गेयोव्योमबंधइति·आघंतेर्दृष्टामिति·पादाघंतवर्णा

योरैक्यादिति।अनारता अविच्छिन्नप्रहरणव्यापारा आसीत्·मन्त्रधीरनागमितिक्रियाविशेषणं·रसे

नवीरेण·महाप्राणशब्द जना·अत्रन्यासः।अत्रपादचतुष्केपिपंक्तिशः परिलेखिते।श्लोकपादत्रके मे

णस्याद्रेखासुमुरजत्रयी·अत्रपुरचतुष्ककल्पनयामुरजत्रयोन्मेषः सुराणां देवानामाननंमुखं

तद्भूतवह्नेः हाननहृष्ययेहानिनाशाय·त्वाननस्तुवे·किंतुस्तौम्येव·पुनरितिदेवतांतरव्यावर्त्तौस्तुत्या

वर्तौवा·अनर्घेधनौघप्राणनेयस्मात्·अनप्राणनइतिधात्वनुसारात्·प्रणतानांमनसियद्दूनंअ

नादिमवपरंपरानुपातिव्यसनंतस्यधूननंप्रतिक्षेपकंमकाननेषुवनगहनेषुस्थानेषुनदीनस्यपयो

राशेरिवनर्द्दनंकोलाहलोयस्येति·न्यासः।श्लोकस्येतस्यपादेषुलिखितेषुचतुर्ष्वपि।त्रिमृदंगकरीह

स्याच्चतुरेकाद्वारावळी·प्रथमपादस्थादक्षरादारभ्यचतुर्थपदस्थमक्षरंयावदेकजातीयाक्षरचतु

घावलीगृहीत्वापरावर्त्यतज्जातीयानामेव चतुष्टयीगृह्यते· तेनैकमुरजोन्मुद्रणमपरत्राप्यनेनैव प्र
कारेणत्रोदाहरणेएकादशमुरजत्रयी भवतीति न्यासार्थः। तालनरोर्यत्मारंरखाघभागः तत्सभेवावदा
ताप्रभायस्याः राका पूर्णिमा तारापतिना चंद्रेण दंत्रिता कवलिता· मारस्य कामस्य धाम स्थानं यत्र· रम
यालक्ष्म्या अधीताऽभ्यस्तासलक्ष्मीकेत्यर्थः वलयामामचालितवती· वलवंतं वाचकार· विन्मतोलुर्गि
त्यनुशासनात्· क्रमेणैवास्य पादेषु प्रसृतेषु चतुर्षपि· तुर्यान्मुरज मार्गेण श्लोकोयमुपजायते। तुर्या
च्चतुर्थपादप्रथमाक्षरात् उपक्रमे येन येन मार्गेण मुरजाकृतिर्लिख्यते· तेनापमपरः श्लोको[illegible]वति· म
वास्पदई क्षितस्यवस्तुनः कोरः कारणं तत्वदं ताः रंदी संधाम कांतिर्यस्याः असमा अनन्यसाधारणी आसि
काछितिर्यस्याः सानापिकालता मालयासंकेतलता मंडपेन अमासाईआपद्या भवती· तारारोहि
णी प्रभृतिः तदाभा· तारे निर्मले मौक्तिके वा भातिया· अतिशयितेन रसेन एणोडुपगता संगता·
प्रहृतोदाहरणे ष्टात्तरपसनावांतः पातीयः प्रकारस्तदंतः पाती मुरजाक्षरे लिख्यते· ननु यावदुद
र्यलत्तनमे ८ वकिंगत्यादि विचित्रतलेथा सति किंगोमूत्रिकादीनां पथग्मागविभागव्याघातः स्यादि

५९

59

स्यत आह। उदाहरणमाचंचेतदिति। गतिः पठितिसंचारो वर्णानामुच्चावचोर्ध्वाधः पर्यायेणप्रवृ
त्ता· मायां संसारबंधमपास्य दुःखभयात्त्रायादिति संबंधः न्यासो यथा अयुग्मतः प्रथमात्तृतीया
च्चोपक्रम्य द्वितीयचतुर्थे पादसंदेशे मंनगो मृत्रिकया प्रथमद्वितीययोस्तृतीयचतुर्थयोश्चप
रस्परमुन्मेषणमितीयमयुक्पादगोमूत्रिका· महासुरजनेन ब्रह्मादिना चित्ते देयो धारणीयः श्री
मेनैकेनविकस्वीकृतइंगरसो गजासुरयुद्धे येन भुभं कल्मषरहितं चित्तं विधत्तामविशेषेणासंसा
रिणामेव· अत्र पूर्ववत्समपादमुपक्रम्य विषमपादसंदेशेन समाम्निरिति विशेषस्तेनेयं युक्पादगो

शं

मूत्रिका· इंदोर्भागः खंडं· कल्याणं अमरजनता देवसमूहः नास्त्यन्यद्धामस्थानं यस्य सोनन्यधामा
·स्वात्माराम इत्यर्थः नपरं देवो देवी च· स्नुवाहून्क्षेपेणाङ्कुशांडुरीरं डुरपनयं नोस्माकं देहे दमं दे
यादिति संबंधः घृतेशभामामप्रणाये नापरस्येत परमेश्वरप्रणायरोषा· नामक्रो ष इति धात्वनु
सारात्· घुसृदना देवाः अरतमविश्रांतं· नंदिनानन्ता उमा गौरी अपूर्वं धामतेजो यस्याः पुराख्य
दानवस्य रवोदावाग्निः स्यानायाः घनायाः संविदो निदानं· दैत्याधीशानां धकेनाननचरणाः म

५९

यानामुत्तमानां भाव्यो ध्येयः रूढ कदाम्यारविंदं नियस्मात् प्रणतानां रुगनुरागो यस्य सुरासुरां मनुजानां च रु

मन्नूः तान्रमतीतिवा· त्याग संपदोनिधानमाश्रयः दिङ्गात्तोमदायिका श्रीर्यस्य सदैउपवने सदैस रा

भयायावधूसुन्दरीयानां खंडनगिरां निर्भर्त्सनवचसामविषयः अदैत्यैधीनदैत्यवर्द्धनः संसारखंधविछि

त्तयेविस्तीर्णारियोनयो यस्य शंभुरखं पिपर्त्ति पूरयतीति शंपरः द्विव्यः सेव्यश्चेति एवंविध श्रुं उ धामारवि:

नोस्माकं देहे भंदं कल्याणं रादे यादित्यर्थः। मंदरचेरं मरालसगमनं कथासु तक्क देवानां वान्नीसु महाशय

तपास्मेण न नं· विघ्नपरंपराहारिणां च सारमुत्कृष्टं· चलंतीनां लतानामारध्वंसान्त्वनं येन बहुविभ्रमान्यं

द्विजराजशेखरत्वात्· समानवर्णाभिध्यर्गः· नवेनकं बुनाथमुपचितं· आद्यश्लोकस्याधस्ताद्विपरीतोद्वि

तीयश्लोको लेख्यः। ततः क्रमगोमूत्रिकयापरस्परोद्धेख्यः अभाग्यस्य दंविलेखकं नाशकमितियाव

त्· समितो संग्रामे रावणास्य केलासोद्धरणलग्नशक्तिकृता· शासनविक्रमगतिराज्ञापोहषेयेनर्द्वं वा तं

छितत्वद्दं चंडमुण्डकमंकमनीयं च परेषां दर्पमर्द्दनशीलं नागस्य कालियाख्यस्य दंष्ट्राभिः कुवलया

पीडाख्यस्य हस्तिनो वा विषाणाभ्यां या आजिः संग्रामः तत्रा जय्यं जेतुमशक्यं· गदयानानारत्नरखचि

ऐक्यकारीवातन्मूर्तित्वात् ५

६०

60

तया कर्बुरं चित्रमिति यावत्। स्कंदः कार्त्तिकेयः। हृंदं विपुलं दारिते शत्रुसमूहे स स्कंदः स्फुरद्रूपः अमंदः स्वच्छचित्तः भवभयस्य संसारत्रासस्य कलने क्षेपणे इह जने मर्त्यलोके संदोहे नयडल्लाघः सामर्थ्यं नीरोगत्वात् तेन ललसनशीलः बलिनां हंता· चंडतायाः तेजस्य स्वमूराश्रयः अखर्वः सर्वेषामुपरिवर्त्तमानः देवो जगत्रातं खंडयित्री ईहा चेष्टा यत्र तादृशो महिम्नि निरतः विहरणे संचरणे सफलः उद्धतः शुभाशुभसूचकत्वात् मेलिकारी संगमकारी वा मूर्तित्वात् कंदोदकुमुदमिहाभिमतं ततिं [illegible] हिकाशेन चलनशीलः ज्यो त्स्नाजलौघान् ददत्। विभ्रमाणां बलेन विहितानि जे आत्मनिरतिर्येन सतथा· विलासावलिषु हारी विकाशो यस्याः लोला चला अमला निर्मला भावानानेकविधान्यासहते सा भावसहा· हावः क्रीडाविशेषः दिवसान्पूरयतीति दिवसपूरः। तस्मै सुष्ठु तामरसेषु भासनशीलाय· नताभव्याय स्मै· अरीन्दारयतीत्यरिदारः ततः कर्मधारयः नतानां भव्यानामरिदारायेति वा· नता[illegible]भव्या[illegible]रिदारा वे[illegible]यो यस्मिन्निति वा· सुष्ठु सारो लयः तत्र लयनं तं भावयति यः तस्मै· नतादिव्यादेवा यस्मै· असदविद्यमानमरिचक्रं यस्य· ततः कर्मधारयः शोभनानां सान्द्रां लसनेन भासनशीलाय भानिन दत्त्वाएया वरितुं

शीलं यस्येति भवरि आकाशं पूरयति व्याप्नोति एवंभूताय· सुघुतारवच्छितोयोरयोवेगः गमनं तेन भाविने· मम
स्फुरतु चिह्नत सततचिंत्यरत्नामतिः समस्तरविचित्रितस्तुतरुचिः स्मरद्वेमहृतू· समर्द्धिरत चिंतितः हृत
विचित्ररत्यामयोनमस्कारेण चिह्नितः स्मितरुचिर्हरः सामरः। मम चिह्नतो मदीयां संविदमारूढः सामरः स
देवो हरः स्फुरतु· सततं चिंतनीयरत्नायां मतिः सततं चिंतनीये रत्नामतीवा यस्य· समस्तेर्इंद्रादिभिरपि रविभि रादि
त्यैर्विचित्रिता आलेख्यीकृता स्तुता प्रशस्ता रुचिः कांतिर्यस्य· स्मरस्य द्वेमंकुशलं हृतं तत्तिच्छिनत्तीति स्मरद्वेमहृ
ध तू· समशद्वः सर्वपर्यायः गणे पठ्यते· सर्वासु अणिमादिष्वृद्धिषु रते श्चिंतितः प्रसभं ध्यातः पतिवियोगाद्विचित्राया
रतेरामयाः कृतायेन नमस्कारेण चिह्नितः प्रणामप्रभाविनी प्रसादजन्मा स्मितप्रभा यस्य· स तथा· अस्यान्यासः
चतुर्णामपि पादानां क्रमेण व्युत्क्रमेण चाद्यं गोमूत्रिका धेनुर्वैपरीत्यवशेन च· क्रमेण पादानां नैरंतर्येण प्रथमद्वि
तीयाभ्यां द्वितीयतृतीयाभ्यां तृतीयचतुर्थाभ्यामिति त्रयः क्रमभेदाः व्युत्क्रमेण पादांतरायेण प्रथमतृतीयाभ्यां प्रथ
मचतुर्थाभ्यां द्वितीयचतुर्थाभ्यामिति व्युत्क्रमभेदास्त्रयः वैपरीत्यवशेन चतुर्थो दितः प्रथमं यावद्योजनेन अत्रापि
क्रमव्युत्क्रमाभ्यां षट्प्रकाराः ते मीद्वादशभेदाः शुद्धाः एषां व्यतिकरजन्मानः पुनरन्ये चतुर्विंशतिर्भवंति· तद्यथा

६१

61

प्रथमतृतीयाभ्यांचप्रथमद्वितीयाभ्यांप्रथमचतुर्थाभ्यांचद्वितीयतृतीयाभ्यांचप्रथमचतुर्थीभ्यांचतृतीयचतुर्था
भ्यांचप्रथमतृतीयाभ्यांचेतिद्रष्टव्यं· तदेवमेकएवगोमूत्रिकाश्लोकोयथोक्तरीत्याषड्विंशद्गोमूत्रिकातर्पकान्प्र
सूतइतीयंगोमूत्रिकाधेनुः॥ वंधारेवीपर्वतपुत्रीनित्यंमधुमधुरकमलवदनापुरंध्र्यधिदेवता· देवैःस्तुत्याकिं
नरंगेयाभक्त्यावरचरितमहिषमथनीजगत्त्रयनायिका॥ सिद्धैर्ध्येयाकेसीरयानाकाम्यारणाचतुररसिकतृ
द्याश्रित्रिलोचनवल्लभा· धीरैःपूज्यादर्पणपाणिर्नूनंगुणनिलयललनललितासतीपुधुरंधरा॥ वरेणादेनचरि
तोनिरर्गलिप्रसरःगुणानामाश्रयःलरमंमनोज्ञंचललितंविलासोयस्याःसातथा· यतिविच्छेदिनीत्येषाश्लो
केधेनुरनुत्तमा॥ छंदोभेदाल्लुप्तमियंप्रसूतेश्लोकतर्पकान्प्रायतयोत्यत्र· मधुमधुरवरचरितेत्यादिनापादा
वयवेनसहप्रतिपादंपदैःसप्तपरिकल्प्यन्ते· अत्रकरणं॥ प्रतिलोमंविनिक्षिप्यमनुलोममधःक्षिपेत्· स्थि
तेनागंतुकंहन्यादीक्षितेनविभाजयेत्· स्थितंप्रतिलोममागंतुकंक्रमविन्यस्तमीक्षितंहिप्रतिलोमस्यक्रमे

६१

णफलंगुणकारः तथैवानुलोमंभागहारः अनेनक्रमेणैकैकयतियोजनेसप्तश्लोकाः यतिद्विकयोज
नेचैकविंशतिःयतित्रिकयोजनेचपंचत्रिंशत्· यतिचतुष्कयोजनेपितावंतएव· यतिपंचकयोजनेपुनरे

श्लोकेयावंतिपदानितावंतोंकान्प्रतिलोमाल्लिखेत् तावतएवानुमांस्तदधःक्षिपेत्। तत्रगुणनभागहाराभ्यांसिद्धोंकःस्थितं। अधःस्थितमीक्षितं। तत्रप्रथमस्यगु
णनाद्यभावादधस्थेनैकेनभागहारमात्रं। ततःस्थितेनागंतुकं [illegible] तेत्। न्यासः। ७।६।५।४।३।२।१।लब्धं ७।२१।३५।३५।२१।७।१।
१।२।३।४।५।६।७।

कविंशतिः षड्भतियो जनेसप्त सप्तयतियो जने त्वेकः सर्वमेलनेनचसप्तविंशत्यधिकंशतं अत्रचक्रियाही
नत्वेनकारकविहीनत्वेनचपदावयववत्तयापादावयवमात्रत्वेनचनिरर्थकान्षड्विंशतिमपास्यधेनुश्लोक
एकएववृत्तभेदेनशतंश्लोकतर्णकान्प्रसूते तथाहि प्रथमद्वितीयचतुर्थाभिर्यतिभिरत्युक्ता जातिःतृतीयपंच
मीभ्यांसुप्रतिष्ठा षष्ठ्यागायत्री सप्तम्याचोष्णिगितिः एकगणानायां वृत्तभेदः एवंद्विकादिगणनेपिशवेषणीयं॥नर
मुखपालिकं रुचिकुरैः गतिभिः सहसास्मितेनललितेसुरशा।मणिशशिपयस्कंबुचमराः करिणःसुतनोः सुधाचह
सिताहरिणाः।फणिगणसिद्धसाध्यदयितानसमाः सकलास्त्वयाचखभुवश्छलिताः।तववलरूपराप्यप्यविजिता
नितरांविबुधाश्चिरायचरितेश्चतुरैः।हेललितेगोरितवशोभनयादृशा सुतनोः शोभनस्यशरीरस्य साध्यादेव
विशेषाः खभुवोग्रहताराद्याः राप्यतइतिशायं आशुयुवपिरपित्रपिचमश्चेतिरायतिभाषितमित्यर्थः दर्पतिपाठेन
वायोजनीयं पदविच्छेदिनीत्येषाश्लोकधेनुरनुत्तमा छंदोभेदाद्दशशतीप्रसूते श्लोकतर्णकान्पदान्यत्रप्रतिपा
दंसुधाकलशाभिधानेछंदसिषड्विभज्यंते यद्यपिद्वितीयतृतीयपादयोश्चकाराभ्यांनकारेणचतुर्थपादेतवेतिप
दाधिक्यंतथाप्यद्यपादार्थानुरोधेनसमुच्चीयमाननिषिध्यमानायानुरंजकत्वेनसंबोध्यमानार्थानुयायितयाचका

६२

रनकारयोस्त्वेवेति च तत्याद्यवयवरूपा एवेति तदसत्कल्पमेव। तथा च षड्भिः पदत्रय उपादीयमाने सप्तदशा
त्तरायां जातौ यथासंख्यानुरोधेनाद्येन प्रस्तार रचनाक्रमेण दशविकल्पाः तृतीयचतुर्थयोश्च पादयोस्तावंत
स्तावंत एवेति। दशभिराहतैर्दशभिः शतं। शतेन चाहतैर्दशभिः शतं। शतेन चाहतैर्दशभिः सहस्रं तावं[?]काः श्लो
काः समुत्पद्यंत इतीयं सहस्रधेनुः॥ क्रियेजयसि जंभसे सृजसि जायसे त्रायसे स्तुषे मिषसि मृष्यसे तृषसि
पीयसे प्रीयसे। स्तुषे मृडसि ह्रोडसे कुरसि गल्भसे ह्लीबसे द्रुपेह रसि रज्यसे रजासि राजसे भ्राजसे। हे क्रिये
कर्म्मनूमिषस्य ङ्क्षयिं। पीडूः पाने। मृड सुखने तुदादौ। होडृ अनादरे। कुड संहारे। रज्यसे आसजसि। रजसि म
त्सरयसि। राजसे शोभसे। भ्राजसे जाज्वल्यसे। एषा तु पादविच्छेदिन्येव धेनुः क्रियापदैः। संबोधनाग्रगे
ष्टास्माभिः श्लोकायुतप्रसूः। इह पृथ्वीनाम निछंदसि। षड्भिः संबोधनानुगे पदचतुष्टये उपादीयमाने एका
दशाक्षरायां जातौ प्रस्ताराल्पत्वेन यदि वा छंदोभेदस्य शब्देनाप्रतिपादितत्वात् तद्भेदोप्युदाहरणीय इति तस्यामे
व रथोद्धताभिधाने छंदसि दशसु विकल्पेषु प्रतिपादं भवत्सु दशभिः शतं शतेन सहस्रं सहस्रेण च दशसह
स्राणि तावंत्यः श्लोकाः समुत्पद्यंत इतीयमयुतधेनुः। दुर्गे भद्रे सुभद्रे दिति सुरजिद्दिते सिंहिके गौरि पद्मे नित्ये

ह्लस्येवरे एयेकलिकमलिकलेकालिकेचंडि चंडे। धन्येपुण्येशरण्येशचिशवरिशिवेभैरवे राद्रिसंध्येछाये
मायेमनोज्ञेवनिजननिजयेमंगलेधेहि शन्नः। संबोधनैरियं धेनुः कृतासैकक्रियापदैः। लक्षत्रयंसह
स्राणिषष्टिं श्लोकान्प्रसूयते· अत्रहिस्रग्धराभिधानेछंदसिपादत्रयपरानुरोधेनात्यद्भुयेनैकेकमेवपदंतुर्य
पादेपरिकल्प्यमितिसर्वत्रैनवसुपदेषुस्थितेषुपदचतुष्टयेपरपंचकेचोपादीयमानेप्रथमेआपातलि
कायांपंचविंशतौद्वितीयेएकयाप्राच्यवृत्त्यासहवैतालीयकेयदिवापंचभिःप्राच्यवृत्तिभिःसममौ
पछंदसिकेचतुर्विंशतौतृतीयवैतालीयएवचतुर्विंशतौचतुर्थेचपादेप्राच्यवृत्तिद्वयेसह ~~षोडशभिः~~म
पार्पतलिकायांषोडशभिरेकयाप्राच्यवृत्त्यावैतालीयप्राच्यवृत्त्यासहवैतालीयैःषड्भिस्तथैवौपछंदसि
केष्वाभ्यामितिचतुर्विंशतौविकल्पेषुप्रभवत्सुपंचविंशत्याहतेषुचतुर्विंशतौशतानिषट्·षड्भिश्चशतै
राहतेषुपंचविंशतौसहस्राणि·पंचदश·तैराहतेषुचतुर्विंशतौलक्षाणित्रीणिसहस्राणिचषष्टिःतस्मि
काःश्लोकाःसमुत्पद्यंतइतीयंलक्षधेनुः॥ एषांत्यपदभेदेनसंभ्रमादिद्विरुक्तिभिः। यावद्बोधंपुनःसूतेप्र
युतंश्लोकतत्तएकान्नु। तथाप्यत्रपादत्रयेनवसुतुर्यपादेचदशसु·त्रयेपदचतुष्के पदपंचकेचोपादीयमा

पः=
पौ० ८

६३ 63

नेप्रथम औपछंदसिकाएकस्य पदस्य द्विरुक्त्या विंशतौ यदिवा आपातलिकायां दश· वैतालीये पंच दश सु औपछंदसिके उदीच्यवृत्तिद्वयेन यद्वैतालीये चतस्रभिरुदीच्यवृत्तिभिः सममेको नविंशतिरिति च पंचविंशतौ तृतीयस्मिन्नौपछंदसिके पंचभिः प्राच्यवृत्तिभिः सममेका दश· वैतालीये तथैव चतुर्दशेति· यद्वा वैतालीये तथैव चतुर्दश औपछंदसिकेति स्रभिः प्राच्यवृत्तिभिः सहषडिति विंशतौ तृतीयस्मिन्नौपछंदसिकेति स्रभिरुदीच्यवृत्तिभिः समं पंचविंशतौ चतुर्थे त्वापातलिकायामेक एव· द्विरुक्त्यादिना षोडशभिः प्राच्यवृत्तिभिः सममशीतौ विकल्पेषु प्रभवत्सु विंशत्याहतपंचविंशतौ पंचविंशत्या द्वाविंशतौ पंचशताधिकानि द्वादश सहस्राणि तेरप्याहतेषु अशीतौ दशलक्षाणि नरोकश्लोकाः समुत्पद्यंत इतीयं प्रयुक्तधेनुः॥ ल्लंट त्से सूक्ष्मंध त्से लु विभवसि नूनसिरमसेरमेदिविमोदसे· छिंत्से बाढंभिंत्से गाढंरुषिमिषसिधनुषिमनुषेजयेयुधिजंभसे· स्वल्पंशेषे कल्पं प्रेषे चिति वचसि यशसियत से चलेगरधिगल्भसे। ब्रूषे वामंसूषेकामंत्रदिविशसि वचसि सचसे रुचेरशिदीप्यसे· प्रेषद्गतिइषगतावित्यस्यचितिचेतन्ये· गरधुन्याधृष्ये· सचसेवचसेरमेजयेचके रुचेइतिदेव्याः संबोधनपदानि· संबोधने द्वितीयांतैः सप्तम्यंतैः क्रिया ६३

सप्ततिसहस्रैराहतेषु पंचाशल्लक्षाः ॥ ५

पदैः ॥ श्लोककोटीरियंति स्त्र: सार्द्धधेनुः प्रसूयते· अत्र खलु जंगविजृंभिते छंदसि एकादशाभ्यः पदेभ्यः पंच
सु षट्सु च पदेषु उपादीयमानेषु जगती जातौ प्रसिद्धात्तरो ज्वला जलधरमाला नवमालिनी छंदस्सु स
प्तसु· द्वितीये पूर्वेषु· चंद्रवर्त्म· द्रुतविलंबित· मणिमाला प्रभवत्सु च शतेतृतीयेस्मिन् प्रथमपादछंद
स्येव पंचाशति चतुर्थपादे द्वितीयपादछंदस्येव शतेषु विकल्पेषु प्रभवत्सु सप्तत्याहतेषु शतेषु स
प्ततिसहस्राणि शतैराहतायां सप्ततिलक्षाणि त्रीणि सहस्राणि च पंचाशतेराहते शते कोट्यस्तिस्रः सार्द्ध
लक्षणिकाः श्लोकाः संपद्यंत इतीयं कोटिधेनुः ॥ यदा तु संभ्रमादिभ्यो भवंत्यस्याद्विरुक्तयः ॥ स्खूलादीनां तदै
षैव दशकोटीः प्रसूयते· तथाहि पदत्रये पदचतुष्के पदपंचके चोपादीयमाने पूर्वस्यामेव जातौ प्रथम
द्वितीयचतुर्थेषु पादेषु प्रत्येकं जलधरमाला प्रभाछंदसो रेकस्य द्वयोर्द्विरुक्त्याशतेतृतीयस्मिंश्च पूर्वयो
र्मणिमालो ज्वला नवमालिनी तामरसेषु छंदस्सु तथैव शतेविकल्पेषु प्रभवत्सु शतेनाहते शते दशसह
स्राणि ते श्वाहते शते दशलक्षाणि तेरष्याहते शतेकोट्यस्त लक्षणिकाः श्लोकाः संपद्यंत इतीयमेव दशकोटिधे
नुः ॥ सार्गधीः श्रीह्रीस्त्रीह्रीभीर्जमैस्तः सर्द्दुः पूर्भ्रृः स्नुक्स्नग्युग्भुग्गुवश्रुक्क्रु ड्विड्युल्लुं च्चिदिन्मुदंग्दि ग्घुः ॥ त्र्य  तॄऽकुं

६५ 64

ग्द्ग्वामामत्तद्धामामुत्दुत्कामाह्वा घैर्गौः सामायामामेधावेधामेनामातेत्वंमेनोः।पदग्रहा यथाकामंका
मधेनुरियंतुनः।परार्द्धानापरार्द्धानिप्रसूतेश्लोकतणीकोन्।तथाहि·पंचदशभ्यः परेभ्यः क्रमव्युत्क्रमाभ्यां
नवादिपदयोगेंगीक्रियमाणेबृहतीजातेरारभ्यप्रतिजातिप्रतिपादंयेविकल्पास्तेरुत्तरोत्तरमाहन्यमानेर्य
दिवासमस्तेपिश्लोकेषष्टिपदेभ्यश्चतुर्विंशत्यष्टाविंशत्यादिपदयोजनायांगायत्रीजातेरारभ्यप्रतिजा
तियेविकल्पास्तेःपरार्द्धभ्यःपरार्द्धानितणीकश्लोकाःसमुत्पद्यंतइतीयंपरार्द्धपरार्द्धधेनुः।एकाक्षरादिछंदोभि
र्गतिबंधादिभेदतः।उक्तानुनिचित्राणिसर्वाणियेषाप्रसूयते।अर्थत्रयप्रतिपादकत्वेनप्रतिपादंपदत्रये
परिकल्प्यमानेऽनेकविधछंदोभिरुक्तानिचतुर्व्यंजनादीन्यनुक्तानिरवङ्गप्रभृतीनिसर्वचित्राण्येयेषे
वयथाकामंप्रसूयतइत्यर्थः।सहृदुच्चारणेनास्यागच्छत्येकाविनाडिका·तत्षष्ट्यानाडिकाताभिःषष्ट्या
स्त्वैरात्रमृच्छति·प्रणवादिनमोन्तानिपदान्यस्याजपन्तियेसर्वभाषासुवाक्तेषामविच्छिन्नाप्रवर्त्तते।सि
द्धैर्मंत्रपदैःसेयंशास्त्राण्यालोच्यनिर्मिता।जपतांजुह्वतांदेवीसर्वान्कामानप्रयच्छति।स्थितेनागंतु
कंहन्यादीप्सितेनविभाजयेत्।तद्भेदास्तेभवन्त्येवमन्येष्वपिहियोजयेत्।यानंयातीतियाकाचिच्च

क्रा ६४

या॰ गिरणं गरणातिवाक् गीः। शरणं शीः शृणातीति शीः श्रयतीति शोभा लक्ष्मीश्च श्रीः ध्यानं ध्यायतीति बुद्धिर्धीः
स्त्र्येव स्तृणाति मंत्राक्षरं च स्त्रीः ह्री च्छतीति माया लज्जा च ह्रीः बिभेतीति भयकामो भयं च भीः ज्वरो गतिर्जरा
च जूः मुर्छा मोहः समुच्छ्राये बंधनं वा मूः। दूरी दूरणं हिंसयोरिति दूः त्वरणं त्वरा हिंसा च त्रित्वरा संभ्रम इति त्व
रते च तूः सूते सवनं सुष्टु उश्च सूः अग्रभागो ध्रुवी हिंसायां धूर्वतीति च धूः पुरी॰ पालनं च पूः भूमिर्भवनं लोक
श्चावांतरमध्येयं भूमिः यज्ञपात्रे स्रवतीति स्रवणं च स्रुक्॰ पुष्पदाम पंक्तिः स्रज्यते च स्रक्॰ योगः समा
धिः समश्च युक्॰ योगसमर्त्तयोरुत्तरपदसमासेनुमागमः। भोजनं पालनं कोटिल्यं चेति भुक्॰ रोगो दीप्तिर्भं
गश्च रुक्॰ शुच शोक इत्यस्य शोको दीप्तिरहरहः क्लिश्यमानो जनं शोचतीति शुचिस्तद्भावश्च शुचित्वं शु
क्॰ अतिलाषः पिपासा हर्द हिंसायामिति तृट् द्वेषः शत्रुरभिलाषश्च द्विट् द्रुयुद्धं युमिश्रण इत्यमिश्रणं अयु
तसिद्धानामित्यादिदर्शनात् अमिश्रणं च युत्॰ क्रोधः क्रुध्यतीति रुद्रशक्तिश्च क्रुत्॰ चेतना चिनोति चयनं च
चित्॰ ज्ञानं संज्ञा लाभश्च वित्॰ मोहो मुंचतीति मुह वैचित्य इति मोहश्च मुक्॰ आशा अतिसर्ग उपदेशश्च दिक्॰
क्रीडा विजिगीषा व्यवहारश्च धुः श्रुति वाक्य विवेचनं हिंसा च त्रक्॰ दृष्टिर्ज्ञानं पश्यतीति दृक्॰ गतिर्गंधनं वि

६५

65

क्षु

कल्पश्चवा·लक्ष्मीमनिंशब्दावयवश्चमा· मतिकामरणंमह्नातीतिमृत· हंततीतिकरणंकरोतीतिकृतु· दी
प्तिर्द्दानंभातीतिचभाः माङ्· मानेशब्दे चेतिशब्दः शब्दावयवः प्रतिषेधश्चमा· हर्षोमोदोमदते आमोदश्चेति
मुत· क्रोधः क्षुधावुभुक्षाक्षुतंक्षोभश्चक्षुत· प्रश्नः सुखंकोननंचका· आमंयातीतिआमापीडाअलक्ष्मीः
शब्दावयवश्च अमा· स्वर्गआकाशंदेवनंचघोः द्यारंद्यास्यउपायश्चद्याः वाकून्मिर्धेनुश्चेतिगोः सहएन
विष्णुनावर्त्ततइतिसालक्ष्मीः सानंतदोरूपंचसा· मेङ्· प्रणिदानइतिप्रणिदानंशब्दावुयवश्चास्मदो रूपं
चमा· रष्टोअयतइतिआयंशब्दावयवश्चया· चंद्रकलामहअस्मदर्थश्चमा· लक्ष्मीसंबोधनंचतुर्थ्यंतिषष्ठ्यं
तंचमे· धारणंपोषणंशब्दावयवश्चधा· पक्षिसंबोधनं अविद्याः संबोधनंशब्दावयवश्चवे· धात्रीपोषयित्रीश
ब्दावयवश्चधा· शब्दावयवश्चास्मदर्थश्चलक्ष्मीसंबोधनंचमे· प्रतिषेधः पुरुषवाक्शब्दावयवश्चना· सुरासु
रैर्नमस्यमानामनंसिमिभीतेमेनामेपित्रे धापिशब्दावयवोमा· तदर्थेयुष्मदर्थोस्मदर्थश्चलक्ष्मीसंबोधनं
चतेमेनत्वमत्वमितिअस्यविक्षोभविइतिवाअत्वं· ममतवतेमेइत्यस्यभावप्रत्ययेशब्दावयवोयुष्मदर्थ
श्चत्वं· शब्दावयवानास्मदर्थोचजनमानंनविघते ओद्विवचनंयस्याः साअनौः अद्वितीयेऽर्थः शब्द

६५

वयवश्चनौः। इति श्रीसरस्वतीकंठाभरणविवरणे रत्नदर्पणनाम्नि चित्रप्रकरणं समाप्तं। द्वितीयः परिच्छेदः॥ ॥ श्री श्री

66

सार स्वतिकंठा भरणा काव्य

१६

११२०